कल्किपुराणम्।

महर्षिवेदव्यासप्रणीतम्।

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतं प्रकाशितञ्च।

RMIC LIBRARY
30.5.7

कलिकातानगर्य्याम्

नारायणयन्त्रे

मुद्रिते।

इं० १८८०।

प्रकाशक—श्रीजीवानन्द विद्यासागर

२ नं॰ रमानाथ मजुमदारের লেন।

प्रिण्टर—श्रीरामनारायण पाल

१৬ नं॰ नूतन पगয়াপটী।

कल्किपुराणस्य सूचीपत्रम् ।

१ अंशः । १ अध्यायः ।

	मङ्गलाचरणम्	१
	सूतसमीपे शौनकादीनां महर्षीणां भविष्यप्रश्नः	१
	शुकस्य कल्किपुराणप्राप्तिविवरणम्	२
	कलेरुत्पत्तिः	२
	कलिविवरणम्	३
	कलौ आचारभ्रंशः	३
	धरित्र्या सह देवानां ब्रह्मलोकगमनम्	४
	ब्रह्मलोकवर्णनम्	४
२ अध्यायः ।	ब्रह्मसमीपे कलेर्दोषकीर्त्तनम्	५
	ब्रह्मणा सह देवानां गोलोके गमनम्	५
	विष्णुसमीपे निवेदनम्	५
	विष्णोर्विष्णुयशसो गृहे अवताराङ्गीकारः	५
	विष्णुयशसः पत्न्याः सुमत्या गर्भः	६
	विष्णौ जाते देवानां हर्षः	६
	विष्णोश्चतुर्भुजमूर्त्तिपरिहारपूर्वकं मानुषरूप-धारणम्	७
	रामकृपव्यासादीनां कल्किदर्शनार्थमागमनम्	७
	कल्केर्नामकरणम्	७
	कल्केरुपनयनकाले पितुरुपदेशः	८
३ अध्यायः ।	कल्केर्गुरुकुलवासार्थं यात्रा जामदग्न्यप्राप्तिश्च	९
	कल्केर्वेदाध्ययनं धनुर्वेदशिक्षा च	१०

गुरुदक्षिणादानाभिलाषः १०
कल्केर्विल्वोदकेश्वरशिवदर्शनं स्तुतिश्च १०
शिवया शिवस्याविर्भावो वरदानञ्च ११
शङ्करात् कल्केः करवालशुकतुरङ्गप्राप्तिः ११
कल्केर्गृहप्रत्यागमनम् १२
कल्केराश्रमधर्म्मोपदेशः १३
४ अध्यायः। कल्केर्धर्म्मकथनम् १३
ब्राह्मणलक्षणम् १४
शुककृतसिंहलद्वीपवर्णनम् १६
पद्मायाः राजकन्यायाः विवरणम् १६
शिवात् पद्मायाः वरलाभः १७
५ अध्यायः। पद्मायाः स्वयंवरोद्योगः १७
समागतभूपानां स्त्रीत्वप्राप्तिः १८
६ अध्यायः। पद्मायाः विलापः २०
कल्केरादेशेन शुकस्य पद्मासमीपे गमनम् २१
पद्माशुकसंवादः २१
७ अध्यायः। विष्णुपूजाप्रकरणम् २४
२ अंशः। १ अध्यायः। २८
पद्मासमीपे अच्युतावतारंकथनम् २८
शुकस्य शम्भले प्रतिगमनम् ३०
कल्किशुकसंवादः ३१
कल्केः सिंहलगमनम् ३१
२ अध्यायः। पद्मायाः कल्किसमीपे गमनम् ३३
पद्मायाः कल्किदर्शनम् ३४

३ अध्यायः । कल्किदर्शनेन भूपानां पुरुषत्वप्राप्तिः ३७
राजगणकृतकल्किस्तवः ३७
४ अध्यायः । अनन्तस्यागमनम् ३९
अनन्तोपाख्यानम् ४०
५ अध्यायः । अनन्तेन हंसस्य साक्षात्कारः ४४
६ अध्यायः । कल्केराज्ञया विश्वकर्मणः शम्भले पुरीनिर्माणम् ४८
कल्केः स्वस्त्रीकस्य शम्भले प्रत्यागमनम् ५०
कल्केः सुतोत्पत्तिः ५१
७ अध्यायः । बौद्धयुद्धम् ५२
जिनविनाशः ५४
बौद्धजयः ५५
३ अंशः । १ अध्यायः ।
म्लेच्छजयः ५६
म्लेच्छकामिनीभिः कल्केर्युद्धम् ५७
२ अध्यायः । बालखिल्यानामागमनम् ६१
निकुम्भदुहितुराख्यानम् ६२
कुथोदर्याः संहारार्थं कल्केर्यात्रा ६३
कुथोदर्या वधः ६४
३ अध्यायः । नारदादीनां महर्षीणामागमनम् ६५
मरोरात्मपरिचयार्थं सूर्य्यवंशवर्णनम् ६६
श्रीरामचरितम् ६७
सीतापरित्यागः ७२
सीताया भूतलप्रवेशः ७२
रामस्य स्वर्गारोहणम् ७२

४ अध्यायः। रामस्य वंशावली, मरोरुत्पत्तिविवरणञ्च ७३
चन्द्रवंशे देवापेरुत्पत्तिविवरणम् ७४
देवापेर्मरोश्च दिव्यरथप्राप्तिः ७६
५ अध्यायः। कृतयुगस्यागमनम् ७६
मन्वन्तरवर्णनम् ७७
कलिना संग्रामोद्योगः ७८
६ अध्यायः। कल्केर्दिग्विजययात्रा ७८
धर्म्मस्य कल्किना समागमः ७९
धर्म्मस्यात्मनिवेदनम् ८०
कलिना कल्केः संग्रामः ८१
मरुदेवापिप्रभृतीनां खशकाम्बोजबर्बरचीना-
दिभिः संग्रामः ८२
७ अध्यायः। कलिसहचराणां पराभवः ८७
कोकविकोकबधः ८४
८ अध्यायः। कल्केर्भल्लाटनगरगमनम् ८६
शशिध्वजस्य समरोद्योगः ८७
९ अध्यायः। मूर्च्छितं कल्किमादाय शशिध्वजस्य गृहा-
गमनम् ९०
१० अध्यायः। सुशान्तायां गीतम् ९२
शशिध्वजकन्यया कल्केर्विवाहः ९५
११ अध्यायः। शशिध्वजस्य हरिभक्तिकारणम् ९६
शशिध्वजस्य पूर्वजन्मवृत्तान्तकथनम् ९६
भक्तिलक्षणम् ९८
१२ अध्यायः। हरिभक्तस्य संग्रामप्रवृत्तिकारणम् १०१

१३ अध्यायः । द्विविदोपाख्यानम् १०३
कृष्णावतारवृत्तान्तम् १०५
१४ अध्यायः । कल्केः काञ्चनपूर्य्यां प्रवेशः १०७
विषकन्यासंवादः १०८
कल्केरनुचराणां पृथक् पृथक् राज्येऽभिषेकः १०८
कल्केः शम्भले प्रतिगमनम् १०८
सत्ययुगप्रवर्त्तनम् १०८
१५ अध्यायः । मायास्तवः ११०
१६ अध्यायः । विष्णुयशसो राजसूययज्ञारम्भः ११२
नारदस्यागमनम् ११३
मायाजीवयोः कथोपकथनम् ११४
विष्णुयशसो वनगमनम् ११५
परशुरामस्यागमनम् ११६
१७ अध्यायः । रुक्मिणीव्रतकथनम् ११६
१८ अध्यायः । कल्केः पत्नीभिर्विहारः १२१
१९ अध्यायः । शम्भले देवानामागमनम् १२३
कल्केः स्वर्गारोहणम् १२५
२० अध्यायः । गङ्गास्तोत्रम् १२७
२१ अध्यायः । कल्किपुराणस्य सूची १२९
कल्किपुराणश्रवणादिफलम् १३२
कल्किपुराणसमाप्तिः । १३२

कल्किपुराणम् ।

प्रथमोऽध्यायः ।

सेन्द्रा देवगणा मुनीश्वरजना लोकाः सपालाः सदा
स्वं स्वं कर्म्म सुसिद्धये प्रतिदिनं भक्त्या भजन्त्युत्तमाः ।
तं विघ्नेशमनन्तमच्युतमजं सर्वज्ञसर्वाश्रयं
वन्दे वैदिकतान्त्रिकादिविविधैः शास्त्रैः पुरोवन्दितम् ॥१॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥ २ ॥

यद्दोर्दण्डकरालसर्पकवलज्वालाज्वलद्विग्रहाः
नेतुः सत्करबालदण्डदलिता भूपाः क्षितिक्षोभकाः ।
शश्वत् सैन्धववाहनो द्विजजनिः कल्किः परात्मा हरिः
पायात् सत्ययुगादिकृत् स भगवान् धर्म्मप्रवृत्तिप्रियः ॥ ३ ॥

इति सूतवचः श्रुत्वा नैमिषारण्यवासिनः ।
शौनकाद्या महाभागाः पप्रच्छुस्तं कथामिमाम् ॥ ४ ॥

हे सूत ! सर्वधर्म्मज्ञ ! लोमहर्षणपुत्रक ! ।
त्रिकालज्ञ ! पुराणज्ञ ! वद भागवतीं कथाम् ॥ ५ ॥

कः कलिः ? कुत्र वा जातो जगतामीश्वरः प्रभुः ।
कथं वा नित्यधर्म्मस्य विनाशः कलिना कृतः ? ॥ ६ ॥

इति तेषां वचः श्रुत्वा सूतो ध्यात्वा हरिं प्रभुम् ।
सहर्षपुलकोद्भिन्न सर्वाङ्गः प्राह तान् मुनीन् ॥ ७ ॥
सूत उवाच । शृणुध्वमिदमाख्यानं भविष्यं परमाद्भुतम् ।
कथितं ब्रह्मणा पूर्वं नारदाय विपृच्छते ॥ ८ ॥
नारदः प्राह मुनये व्यासायामिततेजसे ।
स व्यासो निजपुत्राय ब्रह्मरातायं धीमते ॥ ९ ॥
स चाभिमन्युपुत्राय विष्णुरातायं संसदि ।
प्राह भागवतान् धर्म्मान् अष्टादशसहस्रकान् ॥ १० ॥
तदा नृपे लयं प्राप्ते सप्ताहे प्रश्नशेषितम् ।
मार्कण्डेयादिभिः पृष्टः प्राह पुण्याश्रमे शुकः ॥ ११ ॥
तत्राहं तदनुज्ञातः श्रुतवानस्मि याः कथाः ।
भविष्या कथयामीह पुण्या भागवतीः शुभाः ॥ १२ ॥
ताः शृणुध्वं महाभागाः ! समाहितधियोऽनिशम् ।
गते कृष्णे स्वनिलयं प्रादुर्भूतो यथा कलिः ॥ १३ ॥
प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामहः ।
ससर्ज्ज घोरं मलिनं पृष्ठदेशात् स्वपातकम् ॥ १४ ॥
स चाधर्म्म इति ख्यातस्तस्य वंशानुकीर्त्तनात् ।
श्रवणात् स्मरणाल्लोकः सर्वपापैः प्रमुच्यते ॥ १५ ॥
अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना ।
तस्य पुत्रोऽतितेजस्वी दम्भः परमकोपनः ॥ १६ ॥
स मायायां भगिन्यान्तु लोभं पुत्रञ्च कन्यकाम् ।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत् ॥ १७ ॥
स हिंसायां भगिन्यान्तु जनयामास तं कलिम् ।
वामहस्तधृतोपस्थं तैलाभ्यक्ताञ्जनप्रभम् ॥ १८ ॥

काकोदरं करालास्यं लोलजिह्वं भयानकम्।
पूतिगन्धं द्यूतमद्यस्त्रीसुवर्णकृताश्रयम् ॥ १९ ॥
भगिन्यान्तु दुरुक्त्यां स भयं पुत्रञ्च कन्यकाम्।
मृत्युं स जनयामास तयोश्च निरयोऽभवत् ॥ २० ॥
यातनायां भगिन्यान्तु लेभे पुत्रायुतायुतम्।
इत्थं कलिकुले जाताः बहवो धर्म्मनिन्दकाः ॥ २१ ॥
यज्ञाध्ययनदानादिवेदतन्त्रविनाशकाः।
आधिव्याधिजराग्लानिदुःखशोकभयाश्रयाः ॥ २२ ॥
कलिराजानुगाश्चेरुर्यूथशो लोकनाशकाः।
बभूवुः कालविभ्रष्टाः क्षणिकाः कामुका नराः ॥ २३ ॥
दम्भाचारदुराचारास्तातमातृविहिंसकाः।
वेदहीना द्विजा दीनाः शूद्रसेवापराः सदा ॥ २४ ॥
कुतर्कवादबहुला धर्म्मविक्रयिणोऽधमाः।
वेदविक्रयिणो व्रात्या रसविक्रयिणस्तथा ॥ २५ ॥
मांसविक्रयिणः क्रूराः शिश्नोदरपरायणाः।
परदाररता मत्ता वर्णसङ्करकारकाः ॥ २६ ॥
क्रूरस्वाकाराः पापसाराः शठा मठनिवासिनः।
षोड़शाब्दायुषः श्यालबान्धवा नीचसङ्गमाः ॥ २७ ॥
विवादकलहत्रुब्धाः केशवेशविभूषणाः।
कलौ कुलीना धनिनः पूज्या वार्द्धुषिका द्विजाः ॥२८॥
सन्यासिनो गृहासक्ता गृहस्थास्त्वविवेकिनः।
गुरुनिन्दापरा धर्म्मध्वजिनः साधुवञ्चकाः ॥ २९ ॥
प्रतिग्रहरताः शूद्राः परस्वहरणादराः।
द्वयोः स्वीकारमुद्वाहः शठे मैत्री वदान्यता ॥ ३० ॥

प्रतिदाने क्षमाशक्तौ विरक्तिकरणाक्षमे ।
वाचालत्वञ्च पाण्डित्ये यशोऽर्थे धर्म्मसेवनम् ॥ ३१ ॥
धनाढ्यत्वञ्च साधुत्वे दूरे नीरे च तीर्थता ।
सूत्रमात्रेण विप्रत्वं दण्डमात्रेण मस्करी ॥ ३२ ॥
अल्पशस्या वसुमती नदीतीरेऽवरोपिता ।
स्त्रियो वेश्यालापसुखाः स्वपुंसा त्यक्तमानसाः ॥ ३३ ॥
परान्नलोलुपा विप्राश्चण्डालगृहयाजकाः ।
स्त्रियो वैधव्यहीनाश्च स्वच्छन्दाचरणप्रियाः ॥ ३४ ॥
चित्रवृष्टिकरा मेघा मन्दशस्या च मेदिनी ।
प्रजाभक्षा नृपा लोकाः करपीड़ाप्रपीड़िताः ॥ ३५ ॥
स्कन्धे भारं करे पुत्रं कृत्वा क्षुब्धाः प्रजाजनाः ।
गिरिदुर्गं वनं घोरमाश्रयिष्यन्ति दुर्भगाः ॥ ३६ ॥
मधुमांसैर्मूलफलैराहारैः प्राणधारिणः ।
एवं तु प्रथमे पादे कलेः कृष्णविनिन्दकाः ॥ ३७ ॥
द्वितीये तन्नामहीनास्तृतीये वर्णसङ्कराः ।
एकवर्णाश्चतुर्थे च विस्मृताच्युतसत्क्रियाः ॥ ३८ ॥
निःस्वाध्यायस्वधास्वाहावीषड़ोंकारवर्ज्जिताः ।
देवाः सर्वे निराहाराः ब्रह्माणं शरणं ययुः ॥ ३९ ॥
धरित्रीमग्रतः कृत्वा क्षीणां दीनां मनस्विनीम् ।
ददृशुर्ब्रह्मणो लोकं वेदध्वनिनिनादितम् ॥ ४० ॥
यज्ञधूमैः समाकीर्णं मुनिवर्य्यनिषेवितम् ।
सुवर्णवेदिकामध्ये दक्षिणावर्त्तमुज्ज्वलम् ॥ ४१ ॥
वह्निं यूपाङ्कितोद्यानवनपुष्पफलान्वितम् ।
सरोभिः सारसैर्हंसैराह्वयन्तमिवातिथिम् ॥ ४२ ॥

वायुलोललताजालकुसुमालिकुलाकुलैः ।
प्रणामाह्वानसत्कारमधुरालापवीक्षणैः ॥ ४३ ॥
तद्ब्रह्मसदनं देवाः सेश्वराः क्लिन्नमानसाः ।
विविशुस्तदनुज्ञाता निजकार्य्यं निवेदितुम् ॥ ४४ ॥
त्रिभुवनजनकं सदासनस्थं सनकसनन्दनसनातनैश्च सिद्धैः ।
परिसेवितपादकमलं ब्रह्माणं देवता नेमुः ॥ ४५ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कलिविवरणं
नाम प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

सूत उवाच । उपविष्टास्ततो देवा ब्रह्मणो वचनात् पुरः ।
कलेर्दोषाद्धर्महानिं कथयामासुरादरात् ॥ १ ॥
देवानां तद्वचः श्रुत्वा ब्रह्मा तानाह दुःखितान् ।
प्रसादयित्वा तं विष्णुं साधयिष्याम्यभीप्सितम् ॥ २ ॥
इति देवैः परिवृतो गत्वा गोलोकवासिनम् ।
स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम् ॥ ३ ॥
तत् श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत् ।
शम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम् ।
सुमत्यां मातरि विभो ! कन्यायां त्वन्निदेशतः ॥ ४ ॥
चतुर्भिर्भ्रातृभिर्देव ! करिष्यामि कलिक्षयम् ।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ ॥ ५ ॥
इयं मम प्रिया लक्ष्मीः सिंहले सम्भविष्यति ।
बृहद्रथस्य भूपस्य कौमुद्यां कमलेक्षणा ।
भार्य्यायां मम भार्य्येषा पद्मानाम्नी जनिष्यति ॥ ६ ॥

यात यूयं भुवं देवाः स्वांशावतरणे रताः ।
राजानौ मरुदेवापी स्थापयिष्याम्यहं भुवि ॥ ७ ॥
पुनः कृतयुगं कृत्वा धर्म्मान् संस्थाप्य पूर्ववत् ।
कलिव्यालं संनिरस्य प्रयास्ये स्वालयं विभो ! ॥ ८ ॥
इत्युदीरितमाकर्ण्य ब्रह्मा देवगणैर्वृतः ।
जगाम ब्रह्मसदनं देवाश्च त्रिदिवं ययुः ॥ ९ ॥
महिमा स्वस्य भगवान् निजजन्मकृतोद्यमः ।
विप्रर्षे ! शम्भलग्राममाविवेश परात्मकः ॥ १० ॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम् ।
ग्रहनक्षत्रराश्यादिसेवितश्रीपदाम्बुजम् ॥ ११ ॥
सरित्समुद्रा गिरयो लोकाः सस्थाणुजङ्गमाः ।
सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ ॥ १२ ॥
बभूवुः सर्वसत्त्वानामानन्दा विविधाश्रयाः ।
नृत्यन्ति पितरो हृष्टास्तुष्टा देवा जगुर्यशः ॥ १३ ॥
चक्रुर्वाद्यानि गन्धर्वानन्तुश्चाप्सरोगणाः ॥ १४ ॥
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः ।
जाते ददृशतुः पुत्रं पितरौ हृष्टमानसौ ॥ १५ ॥
धात्रमाता महाषष्ठी नाभिच्छेत्री तदम्बिका ।
गङ्गोदकक्लेदमोचा सावित्री मार्जनोद्यता ॥ १६ ॥
तस्य विष्णोरनन्तस्य वसुधाऽधात् पयःसुधाम् ।
मात्रका माङ्गल्यवचः कृष्णजन्मदिने तथा ॥ १७ ॥
ब्रह्मा तदुपधार्य्याशु स्वाशुगं प्राह सेवकम् ।
याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय ॥ १८ ॥
चतुर्भुजमिदं रूपं देवानामपि दुर्लभम् ।

त्यक्त्वा मानुषवद्रूपं कुरु नाथ! विचारितम् ॥ १९ ॥
इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्।
सशीतः प्राह तरसा ब्रह्मणो वचनादृतः ॥ २० ॥
तच्छ्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्।
तदा तत् पितरौ दृष्ट्वा विस्मयापन्नमानसौ ॥ २१ ॥
भ्रमसंस्कारवत्तत्र मेनाते तस्य मायया।
ततस्तु शम्भलग्रामे सोत्सवा जीवजातयः।
मङ्गलाचारबहुलाः पापतापविवर्जिताः ॥ २२ ॥
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्।
पूर्णकामा विप्रमुख्यानाह्वयादात् गवां शतम् ॥ २३ ॥
हरेः कल्याणदविष्णुयशाः शुद्धेन चेतसा।
सामगैर्यजुर्विद्भिरग्र्यैस्तन्नामकरणे रतः ॥ २४ ॥
तदा रामः कृपो व्यासो द्रौणिर्भिक्षुशरीरिणः।
समायाता हरिं द्रष्टुं बालकत्वमुपागतम् ॥ २५ ॥
तानागतान् समालोक्य चतुरः सूर्य्यसन्निभान्।
हृष्टरोमा द्विजवरः पूजयाञ्चक्र ईश्वरान् ॥ २६ ॥
पूजितास्ते स्वासनेषु संविष्टाः स्वसुखाश्रयाः।
हरिं क्रोड़गतं तस्य ददृशुः सर्वमूर्त्तयः ॥ २७ ॥
तं बालकं नराकारं विष्णुं नत्वा मुनीश्वराः।
कल्किं कल्किविनाशार्थमाविर्भूतं विदुर्बुधाः ॥ २८ ॥
नामाकुर्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम्।
कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसाः ॥ २९ ॥
ततः स वव्रधे तत्र सुमत्या परिपालितः।
कालेनाल्पेन कंसारिः शुक्लपक्षे यथा शशी ॥ ३० ॥

कल्केर्ज्येष्ठास्तयः शूराः कविप्राज्ञसुमन्त्रकाः ।
पितृमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः ॥ ३१ ॥
कल्केरंशाः पुरो जाताः साधवो धर्म्मतत्पराः ।
गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रताः ॥ ३२ ॥
विशाखयूपभूपालपालितास्तापवर्जिताः ।
ब्राह्मणाः कल्किमालोक्य परां प्रीतिमुपागताः ॥ ३३ ॥
ततो विष्णुयशाः पुत्रं धीरं सर्वगुणाकरम् ।
कल्किं कमलपत्राक्षं प्रोवाच पठनाद्दतम् ॥ ३४ ॥
तात ! ते ब्रह्मसंस्कारं यज्ञसूत्रमनुत्तमम् ।
सावित्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि ॥ ३५ ॥

कल्किरुवाच । को वेदः का च सावित्री केन सूत्रेण संस्कृताः ।
ब्राह्मणा विदिता लोके तत्तत्त्वं वद तात ! माम् ॥३६॥

पितोवाच । वेदो हरेर्वाक् सावित्री वेदमाता प्रतिष्ठिता ।
त्रिगुणश्च त्रिवृत् सूत्रं तेन विप्राः प्रतिष्ठिताः ॥ ३७ ॥
दशयज्ञैः संस्कृता ये ब्राह्मणा ब्रह्मवादिनः ।
तत्र वेदाश्च लोकानां त्रयाणामिह पोषकाः ॥ ३८ ॥
यज्ञाध्ययनदानादितपःस्वाध्यायसंयमैः ।
प्रीणयन्ति हरिं भक्त्या वेदतन्त्रविधानतः ॥ ३९ ॥
तस्मात् ययोपनयनकर्म्मणोऽहं द्विजैः सह ।
संस्कर्त्तुं बान्धवजनैस्त्वामिच्छामि शुभे दिने ॥ ४० ॥

पुत्र उवाच । के च ते दश संस्कारा ब्राह्मणेषु प्रतिष्ठिताः ।
ब्राह्मणाः केन वा विष्णुमर्चयन्ति विधानतः ॥ ४१ ॥

पितोवाच । ब्राह्मण्यां ब्राह्मणाद् यातो गर्भाधानादिसंस्कृतः ।
सन्ध्यात्रयेण सावित्रीपूजाजपपरायणः ॥ ४२ ॥

तपस्वी सत्यवाग् धीरो धर्म्मात्मा त्राति संस्कृतिम् ।
विष्णुर्चनमिदं ज्ञात्वा सदानन्दमयो द्विजः ॥ ४३ ॥
पुत्र उवाच । कुत्रास्ते स द्विजो येन तारयत्यखिलं जगत् ।
सन्मार्गेण हरिं प्रीणन् कामदोग्धा जगत्त्रये ॥ ४४ ॥
पितोवाच । कलिना बलिना धर्म्मघातिना द्विजपातिना ।
निराकृता धर्म्मरता गता वर्षान्तरान्तरम् ॥ ४५ ॥
ये स्वल्पतपसो विप्राः स्थिताः कलियुगान्तरे ।
शिश्नोदरभृतोऽधर्म्मनिरता विरतक्रियाः ॥ ४६ ॥
पापसारा दुराचारास्तेजोहीनाः कलाविह ।
आत्मानं रक्षितुं नैव शक्ताः शूद्रस्य सेवकाः ॥ ४७ ॥
इति जनकवचो निशम्य कल्किः
कलिकुलनाशमनोऽभिलाषशाली ।
द्विजनिजवचनैस्तदोपनीतो
गुरुकुलवासमुवास साधुनाथः ॥ ४८ ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्किजन्मोपनयनं
नाम द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

सूत उवाच। ततो वस्तुं गुरुकुले यान्तं कल्किं निरीक्ष्य सः ।
महेन्द्राद्रिस्थितो राम समानीयाश्रमं प्रभुः ॥ १ ॥
प्राह त्वां पाठयिष्यामि गुरुं मां विद्धि धर्म्मतः ।
भृगुवंशसमुत्पन्नं जामदग्न्यं महाप्रभुम् ॥ २ ॥
वेदवेदाङ्गतत्त्वज्ञं धनुर्वेदविशारदम् ।
ज्ञात्वा निःक्षत्रियां पृथ्वीं दत्त्वा विप्राय दक्षिणम् ॥ ३ ॥

महेन्द्राद्रौ तपस्तप्तुमागतोऽहं द्विजात्मज ! ।
त्वं पठात्र निजं वेदं यच्चान्यच्छास्त्रमुत्तमम् ॥ ४ ॥
इति तद्वच आश्रुत्य संप्रहृष्टतनूरुहः ।
कल्किः पुरो नमस्कृत्य वेदाधीती ततोऽभवत् ॥ ५ ॥
सङ्गं चतुःषष्टिकलं धनुर्वेदादिकञ्च यत् ।
समधीत्य जामदग्न्यात् कल्किः प्राह कृताञ्जलिः ॥ ६ ॥
दक्षिणां प्रार्थय विभो ! या देया तव सन्निधौ ।
यया मे सर्वसिद्धिः स्याद् या स्यात् त्वत्तोषकारिणी ॥७॥
ब्रह्मणा प्रार्थितो भूमन् ! कलिनिग्रहकारणात् ।
विष्णुः सर्वाश्रयः पूर्णः स जातः शम्भले भवान् ॥ ८ ॥
मत्तो विद्यां शिवादस्त्रं लब्ध्वा वेदमयं शुकम् ।
सिंहले च प्रियां पद्मां धर्म्मान् संस्थापयिष्यसि ॥ ९ ॥
ततो दिग्विजये भूपान् धर्म्महीनान् कलिप्रियान् ।
निगृह्य बौद्धान् देवापिं मरुञ्च स्थापयिष्यसि ॥ १० ॥
वयमेतैस्तु सन्तुष्टाः साधुकृत्यैः सदक्षिणाः ।
यज्ञं दानं तपः कर्म्म करिष्यामो यथोचितम् ॥ ११ ॥
इत्येतत् वचनं श्रुत्वा नमस्कृत्य मुनिं गुरुम् ।
विल्वोदकेश्वरं देवं गत्वा तुष्टाव शङ्करम् ॥ १२ ॥
पूजयित्वा यथान्यायं शिवं शान्तं महेश्वरम् ।
प्रणिपत्याशुतोषं तं ध्यात्वा प्राह हृदिस्थितम् ॥ १३ ॥

कल्किरुवाच ।

गौरीनाथं विश्वनाथं शरण्यं भूतावासं वासुकीकण्ठभूषम् ।
त्वाद्यं पञ्चास्यादिदेवं पुराणं वन्दे सान्द्रानन्दसन्दोहदक्षम् ॥१४॥
योगाधीशं कामनाशं करालं गङ्गासङ्गक्लिन्नमूर्द्धानमीशम् ।

जटाजूटाटोपरिक्षिप्तभावं महाकालं चन्द्रभालं नमामि ॥१५॥
श्मशानस्थं भूतवेतालसङ्गं नानाशास्त्रैः खड्गशूलादिभिश्च ।
व्यग्रात्युग्रा बाहवो लोकनाशे यस्य क्रोधोद्भूतलोकोऽस्तमेति १६
यो भूतादिः पञ्चभूतैः सिसृक्षुः तन्मात्रात्मा कालकर्म्मस्वभावैः ।
प्रह्वत्येदं प्राप्य जीवत्वमीशो ब्रह्मानन्दो रमते तं नमामि ॥१७॥

स्थितौ विष्णुः सर्वजिष्णुः सुरात्मा
लोकान् साधून् धर्म्मसेतून् बिभर्षि ।
ब्रह्माद्यांशे योऽभिमानी गुणात्मा
शब्दाद्यङ्गैस्तं परेशं नमामि ॥ १८ ॥

यस्याज्ञया वायवो वान्ति लोके ज्वलत्यग्निः सविता याति तप्यन्
शीतांशुः खे तारकैः सग्रहैश्च प्रवर्त्तते तं परेशं प्रपद्ये ॥ १८ ॥
यस्याश्वासात् सर्वधात्री धरित्री देवो वर्षत्यम्बु कालः प्रमाता।
मेरुर्मध्ये भुवनाबाश्च भर्त्ता तमीशानं विश्वरूपं नमामि ॥२०॥

इति कल्किस्तवं श्रुत्वा शिवः सर्वात्मदर्शनः ।
साक्षात् प्राह हसन्नीशः पार्वतीसहितोऽग्रतः ॥ २१ ॥
कल्केः संस्पृश्य हस्तेन सम्भस्तावयवं मुदा ।
तमाह वरय श्रेष्ठ ! वरं यत्तेऽभिकाङ्क्षितम् ॥ २२ ॥
त्वया कृतमिदं स्तोत्रं ये पठन्ति जना भुवि ।
तेषां सर्वार्थसिद्धिः स्यादिह लोके परत्र च ॥ २३ ॥
विद्यार्थी चाप्नुयाद्विद्यां धर्म्मार्थी धर्म्ममाप्नुयात् ।
कामानवाप्नुयात् कामी पठनात् श्रवणादपि ॥ २४ ॥
त्वं गारुड़मिदं चाश्वं कामगं बहुरूपिणम् ।
शुकमेनञ्च सर्वज्ञं मया दत्तं गृहाण भोः ! ॥ २५ ॥
सर्वशास्त्रास्त्रविद्वांसं सर्ववेदार्थपारगम् ।

जयिनं सर्वभूतानां त्वां वदिष्यन्ति मानवाः ॥ २६ ॥
रत्नसरुं करालञ्च करवालं महाप्रभम् ।
गृहाण गुरुभारायाः पृथिव्या भारसाधनम् ॥ २७ ॥
इति तद्वच आश्रुत्य नमस्कृत्य महेश्वरम् ।
शम्भलग्राममगमत् तुरगेण त्वरान्वितः ॥ २८ ॥
पितरं मातरं भ्रातॄन् नमस्कृत्य यथाविधि ।
सर्वं तद्वर्णयामास जामदग्न्यस्य भाषितम् ॥ २९ ॥
शिवस्य वरदानञ्च कथयित्वा शुभाः कथाः ।
कल्किः परमतेजस्वी ज्ञातिभ्योऽप्यवदन्मुदा ॥ ३० ॥
गार्ग्यभर्ग्यविशालाद्यास्तत् श्रुत्वा नन्दिताः स्थिताः ।
कथोपकथनं जातं शम्भलग्रामवासिनाम् ॥ ३१ ॥
विशाखयूपभूपालः श्रुत्वा तेषाञ्च भाषितम् ।
प्रादुर्भावं हरेर्मेने कलिनिग्रहकारकम् ॥ ३२ ॥
माहिष्मत्यां निजपुरे यागदानतपोव्रतान् ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रानपि हरेः प्रियान् ॥ ३३ ॥
स्वधर्म्मनिरतान् दृष्ट्वा धर्म्मिष्ठोऽभून्नृपः स्वयम् ।
प्रजापालः शुद्धमनाः प्रादुर्भावात् श्रियः पतेः ॥ ३४ ॥
अधर्म्मवंश्यांस्तान् दृष्ट्वा जनान् धर्म्मक्रियापरान् ।
लोभानृतादयो जग्मुस्तद्देशात् दुःखिता भृशम् ॥ ३५ ॥
जैत्रं तुरगमारुह्य खड्गञ्च विमलप्रभम् ।
दंशितः सशरं चापं गृहीत्वागात् पुराद्बहिः ॥ ३६ ॥
विशाखयूपभूपालः प्रायात् साधुजनप्रियः ।
कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च शम्भले ॥ ३७ ॥
कविं प्राज्ञं सुमन्तुञ्च पुरस्कृत्य महाप्रभम् ।

गार्ग्यभर्ग्यविशालैश्च ज्ञातिभिः परिवारितम् ॥ ३८ ॥
विशाखयूपो ददृशे चन्द्रं तारागणैरिव ।
पुराद्वहिः सुरैर्यद्वदिन्द्रमुच्चैःश्रवःस्थितम् ॥ ३९ ॥
विशाखयूपोऽवनतः सम्प्रहृष्टतनूरुहः ।
कल्केरालोकनात् सद्यः पूर्णात्मा वैष्णवोऽभवत् ॥४०॥
सह राज्ञा वसन् कल्किः धर्म्मानाह पुरोदितान् ।
ब्राह्मणक्षत्रियविशामाश्रमाणां समासतः ॥ ४१ ॥
ममांशान् कलिविभ्रष्टानिति मज्जन्मसङ्गतान् ।
राजसूयाश्वमेधाभ्यां मां यजस्व समाहितः ॥ ४२ ॥
अयमेव परो लोको धर्म्मश्चाहं सनातनः ।
कालस्वभावसंस्काराः कर्म्मानुमतयो मम ॥ ४३ ॥
सोमसूर्य्यकुले जातौ देवापिमरुसंज्ञकौ ।
स्थापयित्वा कृतयुगं कृत्वा यास्यामि सद्गतिम् ॥ ४४ ॥
इति तद्वचनं श्रुत्वा राजा कल्किं हरिं प्रभुम् ।
प्रणम्य प्राह सद्धर्म्मान् वैष्णवान् मनसेप्सितान् ॥ ४५ ॥
इति नृपवचनं निशम्य कल्किः कलिकुलनाशनवासनावतारः ।
निजजनपरिषद्विनोदकारी मधुरवचोभिराह साधुधर्म्मान् ॥४६॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्किवरलाभ-
नामकस्तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

सूत उवाच । ततः कल्किः सभामध्ये राजमानो रविर्यथा ।
बभाषे तं नृपं धर्म्ममयो धर्म्मान् द्विजप्रियान् ॥ १ ॥

कल्किरुवाच । कालेन ब्रह्मणो नाशे प्रलये मयि संस्थिते: ।
अहमेवासमेवाग्रे नान्यत् कार्य्यमिदं मम ॥ २ ॥
प्रसुप्तलोकतन्त्रस्य हैतहीनस्य चात्मन: ।
महानिशान्ते रन्तुं मे समुद्भूतो विराट् प्रभु: ॥ ३ ॥
सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात् ।
तदभ्रजोऽभवद् ब्रह्मा वेदवक्त्रो महाप्रभु: ॥ ४ ॥
जीवोपाधेर्ममांशाश्च प्रहत्या मायया स्वया ।
ब्रह्मोपाधि: स सर्वज्ञो मम वाग्वेदशासित: ॥ ५ ॥
ससर्ज्ज जीवजातानि कालमायांशयोगत: ।
देवा मन्वादयो लोका: सप्रजापतय: प्रभु: ॥ ६ ॥
गुणिन्या मायया युक्ता मे नानोपाधी ससर्जरे ।
सोपाधय इमे लोका देवा: सस्थानुजन्मभा: ॥ ७ ॥
ममांशा मायया सृष्टा यतो मय्याविशन् लये ।
एवंविधा ब्राह्मणा ये मत्शरीरा मदात्मिका: ॥ ८ ॥
मानुवरन्ति भुवने यज्ञाध्ययनसत्क्रिया: ।
मां प्रसेवन्ति शंसन्ति तपोदानक्रियास्विह ॥ ९ ॥
स्मरन्त्यामोदयन्त्येव नान्ये देवादयस्तथा ।
ब्राह्मणा वेदवक्तारो वेदा मे मूर्त्तय: परा: ॥ १० ॥
तस्मादिमे ब्राह्मणजास्तै: पुष्टास्त्रिजगज्जना: ।
जगन्ति मे शरीराणि तत्पोषे ब्रह्मणो वर: ॥ ११ ॥
तेनाहं तान् नमस्यामि शुद्धसत्वगुणाश्रय: ।
ततो जगन्मयं पूर्वं मां सेवन्तेऽखिलाश्रया: ॥ १२ ॥

विष्णुयशा उवाच । विप्रस्य लक्षणं ब्रूहि त्वन्नाम्ना: का च तत्कृता ।
यतस्त्वानुग्रहेण वाग्वाणा ब्राह्मणा: स्मृता: ॥ १३ ॥

कल्किरुवाच। वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत्परम्।
ते वेदा ब्राह्मणमुखे मानाधर्म्मै प्रकाशिताः॥ १४॥
यो धर्म्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्पफला।
तयाहं तोषितः शीघ्रः सम्भवामि युगे युगे॥ १५॥
ऊर्ण्णन्तु त्रिगुणं सूत्रं सधवानिर्मितं शुभैः।
तत्सूत्रत्रयमधोदत्तं यज्ञसूत्रं विदुर्बुधाः॥ १६॥
त्रिगुणं तदभिन्नियुक्तं वेदप्रवरसंमितम्।
शिरोधरात् नाभिमध्यात् पृष्ठार्द्धपरिमाणकम्॥ १७॥
यजुर्विदां नाभिमितं सामगानामयं विधिः।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम्॥ १८॥
मृदभस्मचन्दनाद्यैस्तु धारयेत् तिलकं द्विजः।
भाले त्रिपुण्ड्रं कर्त्तव्यं केशपर्य्यन्तमुज्ज्वलम्॥ १९॥
पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत् त्रिधा स्मृतम्।
ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम्॥ २०॥
ब्राह्मणानां करे स्वर्गो वाचो वेदाः करे हरिः।
गात्रे तीर्थानि रागाश्च नाड़ीषु प्रकृतिस्त्रिधृत्॥ २१॥
सावित्री कण्ठकुहरा हृदयं ब्रह्मसंज्ञितम्।
तेषां स्तनान्तरे धर्म्मः पृष्ठोऽधर्म्मः प्रकीर्त्तितः॥ २२॥
भूदेवा ब्राह्मणा राजन्! पूज्या वन्द्या सदुक्तिभिः।
चतुराश्रम्यकुशला मम धर्म्मप्रवर्त्तकाः॥ २३॥
बालाश्चापि ज्ञानहृद्वास्तपोवृद्धा मम प्रियाः।
तेषां वचः पालयितुम् अवतारः कृता मया॥ २४॥
महाभाग्यं ब्राह्मणानां सर्वपापप्रणाशनम्।
कलिदोषहरं श्रुत्वा मुच्यते सर्वतो भयात्॥ २५॥

इति कल्किवचः श्रुत्वा कलिदोषविनाशनम् ।
प्रणम्य तं शुद्धमनाः प्रययौ वैष्णवाग्रणीः ॥ २६ ॥
गते राजनि सन्ध्यायां शिवदत्तशुको बुधः ।
चरित्वा कल्किपुरतः स्तुत्वा तं पुरतः स्थितः ॥ २७ ॥
तं शुकं प्राह कल्किस्तु सस्मितं स्तुतिपाठकम् ।
स्वागतं भवता कस्मात् देशात् किं खादितं ततः ॥२८॥
शुक उवाच । शृणु नाथ ! वचो मह्यं कौतूहलसमन्वितम् ।
अहं गतश्च जलधेर्मध्ये सिंहलसंज्ञके ॥ २९ ॥
यथावृत्तं द्वीपगतं तच्चित्रं श्रवणप्रियम् ।
बृहद्रतस्य नृपतेः कन्यायाश्चरितामृतम् ॥ ३० ॥
कौमुद्यामिह जातायाः जगतां पापनाशनम् ।
चरितं सिंहले द्वीपे चातुर्वर्ण्यजनावृते ॥ ३१ ॥
प्रासादधर्म्यसदनपुरराजिविराजिते ।
रत्नस्फाटिककुड्यादिस्वर्णताभिर्विभूषिते ॥ ३२ ॥
स्त्रीभिरुत्तमवेशाभिः पद्मिनीभिः समावृते ।
सरोभिः सारसैर्हंसैरुपकूलजलाकुले ॥ ३३ ॥
भृङ्गरङ्गप्रसङ्गाढ्ये पद्मैः कह्लारकुन्दकैः ।
नानाम्बुजलताजालवनोपवनमण्डिते ॥ ३४ ॥
देशे बृहद्रतो राजा महाबलपराक्रमः ।
तस्य पद्मावती कन्या धन्या रेजे यशस्विनी ॥ ३५ ॥
भुवने दुर्लभा लोकेऽप्रतिमा वरवर्णिनी ।
काममोहकरी चारुचरित्रा चित्रनिर्मिता ॥ ३६ ॥
शिवसेवापरा गौरी यथा पूज्या सुसम्मता ।
सखीभिः कन्यकाभिश्च जपध्यानपरायणा ॥ ३७ ॥

ज्ञात्वा तां च हरेर्लक्ष्मीं समुद्भूतां वराङ्गनाम्।
हरः प्रादुरभूत् साक्षात् पार्वत्या सह हर्षितः ॥ ३८ ॥
सा तमालोक्य वरदं शिवं गौरीसमन्वितम्।
लज्जिताधोमुखी किञ्चिन्नोवाच पुरतः स्थिता ॥ ३९ ॥
हरस्तामाह सुभगे! तव नारायणः पतिः।
पाणिं ग्रहीष्यति मुदा नान्यो योग्यो नृपात्मजः ॥४०॥
कामभावेन भुवने ये त्वां पश्यन्ति मानवाः।
तेनैव वयसा नार्य्यो भविष्यन्त्यपि तत्क्षणात् ॥ ४१ ॥
देवासुरास्तथा नागा गन्धर्वाश्चारणादयः।
त्वया रन्तुं यथाकाले भविष्यन्ति किल स्त्रियः ॥ ४२ ॥
विना नारायणं देवं त्वत्पाणिग्रहणार्थिनम्।
गृहं याहि तपस्त्यक्त्वा भोगायतनमुत्तमम् ॥ ४३ ॥
मा चोभय हरेः पद्मे! कमले! विमलं कुरु।
इति दत्त्वा वरं सोमस्तत्रैवान्तर्दधे हरः ॥ ४४ ॥

हरवरमिति सा निशम्य पद्मा
समुचितमात्ममनोरथप्रकाशम्।
विकसितवदना प्रणम्य सोमं
निजजनकालयमाविवेश रामा ॥ ४५ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये हरवरप्रदान-
नामकश्चतुर्थोऽध्यायः।

पञ्चमोऽध्यायः।

शुक उवाच। गते बहुतिथे काले पद्मां वीक्ष्य बृहद्व्रतः।
निरूढ़यौवनां पुत्रीं विस्मितः पापशङ्कया ॥ १ ॥

कौमुदीं प्राह महिषीं पद्मोद्वाहेऽत्र कं नृपम् ।
वरयिष्यामि सुभगे ! कुलशीलसमन्वितम् ॥ २ ॥
सा तमाह पतिं देवी शिवेन प्रतिभाषितम् ।
विष्णुरस्याः पतिरिति भविष्यति न संशयः ॥ ३ ॥
इति तस्या वचः श्रुत्वा राजा प्राह कदेति ताम् ।
विष्णुः सर्वगुहावासः पाणिमस्या ग्रहीष्यति ॥ ४ ॥
न मे भाग्योदयः कश्चित् येन जामातरं हरिम् ।
वरयिष्यामि कन्यार्थे वेदवत्या मुनेर्यथा ॥ ५ ॥
इमां स्वयंवरां पद्मां पद्मामिव महोदधेः ।
मथनेऽसुरदेवानां तथा विष्णुर्ग्रहीष्यति ॥ ६ ॥
इति भूपगणान् भूपः समाहूय पुरस्कृतान् ।
गुणशीलवयोरूपविद्याद्रविणसंवृतान् ॥ ७ ॥
स्वयंवरार्थं पद्मायाः सिंहले बहुमङ्गले ।
विचार्य्य कारयामास स्थानं भूपनिवेशनम् ॥ ८ ॥
तत्रायाता नृपाः सर्वे विवाहकृतनिश्चयाः ।
निजसैन्यैः परिवृताः स्वर्णरत्नविभूषिताः ॥ ९ ॥
रथान् गजानश्ववरान् समारूढा महाबलाः ।
श्वेतच्छत्रकृतच्छायाः श्वेतचामरवीजिताः ॥ १० ॥
शस्त्रास्त्रतेजसा दीप्ता देवाः सेन्द्रा इवाभवन् ।
रुचिराश्वः सुकर्म्मा च मदिराक्षो दृढाशगः ॥ ११ ॥
कृष्णसारः पारदश्च जीमूतः क्रूरमर्दनः ।
काशः कुशाम्बुर्वसुमान् कङ्कः क्रथनसञ्जयौ ॥ १२ ॥
गरुमित्रः प्रमाथी च विजृम्भः सृञ्जयोऽजमः ।
एते चान्ये च बहवः समायाता महाबलाः ॥ १३ ॥

विविशुस्ते रङ्गगता स्वस्वस्थानेषु पूजिताः ।
वाद्यताण्डवसंहृष्टाश्चित्रमाल्याम्बराधराः ॥ १४ ॥
नानाभोगसुखोद्रिक्ताः कामरामा रतिप्रदाः ।
तानालोक्य सिंहलेशः स्वां कन्यां वरवर्णिनीम् ॥ १५ ॥
गौरीं चन्द्राननां श्यामां तारहारविभूषिताम् ।
मणिमुक्ताप्रवालैश्च सर्वाङ्गालङ्कृतां शुभाम् ॥ १६ ॥
किं मायां मोहजननीं किंवा कामप्रियां भुवि ।
रूपलावण्यसम्पन्ना न चान्यामिह दृष्टवान् ॥ १७ ॥
स्वर्गे क्षितौ वा पातालेऽप्यहं सर्वत्रगो यदि ।
पश्चाद्दासीगणाकीर्णां सखीभिः परिवारिताः ॥ १८ ॥
दौवारिकैर्वेत्रहस्तैः शासिताम्तःपुराद्दहिः ।
पुरोवन्दिगणाकीर्णां प्रापयामास तां शनैः ॥ १९ ॥
नूपुरैः किङ्किणीभिश्च क्वणन्तीं जनमोहिनीम् ।
स्वागतानां नृपाणाञ्च कुलशीलगुणान् वहन् ॥ २० ॥
भ्रमन्ती हंसगमना रत्नमालाकरग्रहा ।
रुचिरापाङ्गभङ्गेन प्रेक्षन्ती लोलकुण्डला ॥ २१ ॥
नृत्यत्कुन्तलसोपानगण्डमण्डलमण्डिता ।
किञ्चित् स्मेरोल्लसद्वक्त्रदशनद्योतदीपिता ॥ २२ ॥
वेदीमध्यारुणक्षौमवसना कोकिलस्वना ।
रूपलावण्यपण्येन क्रेतुकामा जगत्त्रयम् ॥ २३ ॥
मागतां तां प्रसमीक्ष्य भूपाः संमोहिनीं कामविमूढचित्ताः ।
तुः क्षितौ विस्मृतवस्त्रशस्त्राः रथाश्वमत्तद्विपवाहनास्ते ॥२४॥
स्याः स्मरक्षोभनिरीक्षणेन स्त्रियो बभूवः कमनीयरूपाः ।
हन्नितम्बस्तनभारनम्राः सुमध्यमास्तत्स्मृतिजातरूपाः ॥२५॥

विलासहासव्यसनातिचिचाः कान्तानना: शोणसरोजनेत्राः।
स्त्रीरूपमात्मानमवेक्ष्य भूपाः तामन्वगच्छन् विशदानुवृत्त्या ॥२
अहं वटस्थः परिधर्षितात्मा पद्माविवाहोत्सवदर्शनाकुलः ।
तस्या वचोऽन्तर्हृदि दुःखितायाः श्रोतुं स्थितः स्त्रीत्वमितेषु तेषु२
जाहोहि कल्के! कमलाविलापं श्रुतं विचित्रं जगतामधीश!।
गते विवाहोत्सवमङ्गले सा शिवं शरण्यं हृदये निधाय ॥२८॥
तान् दृष्ट्वा नृपतीन् गजाश्वरथिभिस्त्यक्तान् सखित्वं गतान्
स्त्रीभावेन समन्वितानानुगतान् पद्मां विलोक्यान्तिके ।
दीना त्यक्तविभूषणा विलिखती पादाङ्गुलैः कामिनी
ईशं कर्त्तुं निजनाथमीश्वरवचस्तथ्यं हरिं साऽस्मरत् ॥ २९ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये पद्मास्वयंवरे भूपतीनां स्त्रीत्वकथनं नाम पञ्चमोऽध्यायः।

षष्ठोऽध्यायः।

शुक उवाच। ततः सा विस्मितमुखी पद्मा निजजनैर्वृता।
हरिं पतिं चिन्तयन्ती प्रोवाच विमलां स्थिताम् ॥ १ ॥
पद्मोवाच। विमले! किं कृतं धात्रा ललाटे लिखनं मम।
दर्शनादपि लोकानां पुंसां स्त्रीभावकारकम् ॥ २ ॥
ममापि मन्दभाग्यायाः पापिन्याः शिवसेवनम्।
विफलत्वमनुप्राप्तं बीजमुप्तं यथोषरे ॥ ३ ॥
हरिर्लक्ष्मीपतिः सर्वजगतामधिपः प्रभुः।
मत्कृतेऽप्यभिलाषं किं करिष्यति जगत्पतिः ॥ ४ ॥
यदि शम्भोर्वचो मिथ्या यदि विष्णुर्न मां स्मरेत्।

मदाहमनले देहं त्यक्ष्यामि करिभाविता ॥ ५ ॥
क्व चाहं मानुषी दीना क्वास्ते देवो जनार्दनः।
निगृहीता विधात्राहं शिवेन परिवञ्चिता ॥ ६ ॥
विष्णुना च परित्यक्ता मदन्या कात्र जीवति ॥ ७ ॥
इति नाना विलापिन्या वचनं शोचनाश्रयम्।
पद्मायाश्चारुचेष्टायाः श्रुत्वायातस्तवान्तिकं ॥ ८ ॥
शुकस्य वचनं श्रुत्वा कल्किः परमविस्मितः।
तं जगाद पुनर्याहि पद्मां बोधयितुं प्रियाम् ॥ ९ ॥
मत्सन्देशहरो भूत्वा मद्रूपगुणकीर्त्तनम्।
श्रावयित्वा पुनः कीर! समायास्यसि बान्धव! ॥१०॥
सा मे प्रिया पतिरहं तस्या दैवविनिर्मितः।
मध्यस्थेन त्वया योगमावयोश्च भविष्यति ॥ ११ ॥
सर्वज्ञोऽसि विधिज्ञोऽपि कालज्ञोऽसि कथामृतैः।
तामाश्वास्य ममाश्वासकथास्तस्याः समाहरः ॥ १२ ॥
इति कल्केर्वचः श्रुत्वा शुकः परमहर्षितः।
प्रणम्य तं प्रीतमनाः प्रययौ सिंहलं त्वरन् ॥ १३ ॥
खगः समुद्रपारेण स्नात्वा पीत्वामृतं पयः।
बीजपूरफलाहारी ययौ राजनिवेशनम् ॥ १४ ॥
तत्र कन्यापुरं गत्वा हत्वे नागेश्वरे वसन्।
पद्मामालोक्य तां प्राह शुको मानुषभाषया ॥ १५ ॥
कुशलं ते वरारोहे! रूपयौवनशालिनि!।
त्वां लोलनयनां मन्ये लक्ष्मीरूपामिवापराम् ॥ १६ ॥
पद्माननां पद्मगन्धां पद्मनेत्रां कराम्बुजे।
कमलं कालयन्तीं त्वां लक्षयामि परां श्रियम् ॥ १७ ॥

9682
THE RAMAKRISHNA MISSION
INSTITUTE OF CULTURE
LIBRARY

किं धात्रा सर्वजगतां रूपलावण्यसम्पदाम् ।
निर्मितासि वरारोहे ! जीवानां मोहकारिणि ! ॥१८॥
इति भाषितमाकर्ण्य कीरस्यामितमद्भुतम् ।
हसन्ती प्राह सा देवी तं पद्मा पद्ममालिनी ॥ १९ ॥
कस्त्वं ? कस्मादागतोऽसि ? कथं मां शुकरूपधृक् ।
देवो वा दानवो वा त्वम् ? आगतोऽसि दयापरः ॥२०
शुक उवाच । सर्वज्ञोऽहं कामगामी सर्वशास्त्रार्थतत्त्ववित् ।
देवगन्धर्वभूपानां सभासु परिपूजितः ॥ २१ ॥
चरामि स्वेच्छया क्षे त्वाम् ईक्षणार्थमिहागतः ।
त्वामहं हृदि सन्तप्तां त्यक्तभोगां मनस्विनीम् ॥ २२ ॥
हास्यालापसखीसङ्गदेहाभरणवर्जिताम् ।
विलोक्याहं दीनचेताः पृच्छामि श्रोतुमीरितम् ।
कोकिलालाप-सन्तापजनकं मधुरं मृदु ॥ २३ ॥
तव दन्तौष्ठजिह्वाग्रललितारुणपङ्कजयः ।
यत्कर्णकुहरे मग्नास्तेषां किं वर्ण्यते तपः ॥ २४ ॥
सौकुमार्यं शिरीषस्य वा कान्तिर्वा निशाकरे ।
पीयुषं वा वदन्त्येवानन्दं ब्रह्मणि ते बुधाः ॥ २५ ॥
तव बाहुलताबद्धा ये पास्यन्ति सुधाननम् ।
तेषां तपोदानजपैर्व्यर्थैः किं जनयिष्यति ॥ २६ ॥
तिलकालकसंमिश्रं लोलकुण्डलमण्डितम् ।
लोलेक्षणोल्लसद्वक्त्रं पश्यतां न पुनर्भवः ॥ २७ ॥
हृद्दुःखसुते ! स्वाधिं वद भामिनि ! यत्कृते ।
तपःक्षीणामिव तनूं लक्षयामि रुजं विना ।
कनकप्रतिमा यद्वत् पांशुभिर्मलिनीकृता ॥ २८ ॥

ोवाच। किं रूपेण कुलेनापि धनेनाभिजनेन वा।
सर्वं निष्फलतामेति यस्य दैवमदक्षिणम् ॥ २८ ॥
शृणु कोर! समाख्यानं यदि वाविदितं तव।
बाल्य-पौगण्ड-कैशोरे हरसेवां करोम्यहम् ॥ ३० ॥
तेन पूजाविधानेन तुष्टो भूत्वा महेश्वरः।
वरं वरय पद्मे! त्वमित्याह प्रियया सह ॥ ३१ ॥
लज्जयाधोमुखीमग्रे स्थितां मां वीक्ष्य शङ्करः।
प्राह, ते भविता स्वामी हरिर्नारायणः प्रभुः ॥ ३२ ॥
देवो वा दानवो वाऽथो गन्धर्वो वा तवेक्षणात्।
कामेन मनसा नारी भविष्यति न संशयः ॥ ३३ ॥
इति दत्त्वा वरं सोमः प्राह विष्णुर्वनं यथा।
तथाहं ते प्रवक्ष्यामि समाहितमनाः शृणु ॥ ३४ ॥
एताः सख्यो नृपाः पूर्वमाहूता ये स्वयम्वरे।
पित्रा धर्म्मार्थिना दृष्ट्वा रम्यां मां यौवनान्विताम् ॥ ३५॥
स्वागतास्ते सुखासीना विवाहज्ञातनिश्चयाः।
युवानो गुणवन्तश्च रूपद्रविणसम्मताः ॥ ३६ ॥
स्वयंवरगतां मां ते विलोक्य रुचिरप्रभाम्।
रत्नमालान्वितकरां निपेतुः काममोहिताः ॥ ३७ ॥
तत उत्थाय संभ्रान्ताः संप्रेक्ष्य स्त्रीत्वमात्मनः।
स्तनभारनितम्बेन गुरुणा परिणामिताः ॥ ३८ ॥
व्रिया भिया च शत्रूणां मित्राणामतिदुःखदम्।
स्त्रीभावं मनसा ध्यात्वा मामवानुगताः शुक! ॥ ३९ ॥
पारिचर्य्या हररताः सख्यः सर्वगुणान्विताः।
मया सह तपोध्यानपूजाः कुर्वन्ति सम्मताः ॥ ४० ॥

तदुदितमिति संनिशम्य कीरः श्रवणसुखं निजमानसप्रकाशम्।
समुचितवचनैः प्रतोष्य पद्मां मुरहरयजनं पुनः प्रचष्टे॥ ४१ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये शुकपद्मासंवादे
षष्ठोऽध्यायः।

सप्तमोऽध्यायः।

शुक उवाच। विष्णुर्चनं शिवेनोक्तं श्रोतुमिच्छाम्यहं शुभे!।
धन्यासि कृतपुण्यासि शिवशिष्यत्वमागता॥ १॥
अहं भाग्यवशादत्र समागम्य तवान्तिकम्।
शृणोमि परमाश्चर्यं कीराकारनिवारणम्॥ २॥
भगवद्भक्तियोगश्च जपध्यानविधिं मुदा।
परमानन्दसन्दोहदानदक्षं श्रुतिप्रियम्॥ ३॥
पद्मोवाच। श्रीविष्णोरर्चनं पुण्यं शिवेन परिभाषितम्।
यत् श्रद्धयानुष्ठितस्य श्रुतस्य गदितस्य च॥ ४॥
सद्यः पापहरं पुंसां गुरुगोब्रह्मघातिनाम्।
समाहितेन मनसा शृणु कोर! यथोदितम्॥ ५॥
स्नात्वा यथोक्तकर्माणि पूर्वाह्णे ज्ञानतः शुचिः।
प्रक्षाल्य प्राणी पादौ च स्पृष्ट्वापः स्वासने वसेत्॥ ६॥
प्राचीमुखः संयतात्मा साङ्गन्यासं प्रकल्पयेत्।
भूतशुद्धिं ततोऽर्घ्यस्य स्थापनं विधिवच्चरेत्॥ ७॥
ततः केशवकृत्यादिन्यासेन तन्मयो भवेत्।
आत्मानं तन्मयं ध्यात्वा हृदिस्थं स्वासने न्यसेत्॥ ८॥
पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः।
यथोपचारैः संपूज्य मूलमन्त्रेण देशिकः॥ ९॥

ध्यायेत् पादादिकेशान्तं हृदयाम्बुजमध्यगम्।
प्रसन्नवदनं देवं भक्ताभीष्टफलप्रदम् ॥ १० ॥

ओं नमो नारायणाय स्वाहा।

योगीन्द्रसिद्धविबुधैः परिभाव्यमाणं
लक्ष्म्यालयं तुलसिकाचितभक्तभृङ्गम्।
प्रोत्तुङ्गरत्ननखराङ्गुलिपत्रचित्रं
गङ्गारसं हरिपदाम्बुजमाश्रयेऽहम् ॥ ११ ॥
गुम्फन्मणिप्रचयवर्तितराजहंस-
सिञ्जत्सुनूपुरयुतं पदपद्महस्तम्।
पीताम्बराञ्चलविलोलबलत्पताकं
स्वर्णत्रिवक्रवलयञ्च हरेः स्मरामि ॥ १२ ॥
जङ्घे सुपर्णगलनीलमणिप्रवृद्धे
शोभास्पदारुणमणिद्युतिचञ्चुमध्ये।
आरक्तपादतललम्बनशोभमाने
लोकेक्षणोत्सवकरे च हरेः स्मरामि ॥ १३ ॥
ते जानुनी मखपतेर्भुजमूलसङ्ग-
रङ्गोत्सवाद्भुततडिद्वसने विचित्रे।
चञ्चत्पतङ्गमुखनिर्गतसामगीत-
विस्तारितात्मयशसी च हरेः स्मरामि ॥ १४ ॥
विष्णोः कटिं विधिकृतान्तमनोजभूमिं
जीवाण्डकोषगणसङ्गदुकूलमध्याम्।
नानागुणप्रकृतिपीतविचित्रवस्त्रां
ध्यायेन्निवद्धवसनां खगपृष्ठसंस्थाम् ॥ १५ ॥

शातोदरं भगवतस्त्रिवलिप्रकाशम्
आवर्त्तनाभिविकसद्विधिजन्मपद्मम् ।
नाड़ीनदीगणरसोत्थसिताम्बसिन्धुं
ध्यायेऽण्डकोषनिलयं तनुलोमरेखम् ॥ १६ ॥
वक्षः पयोधितनयाकुचकुङ्कुमेन
हारेण कौस्तुभमणिप्रभया विभातम् ।
श्रीवत्सलक्ष्म हरिचन्दनजप्रसून-
मालोचितं भगवतः सुभगं स्मरामि ॥ १७ ॥
बाहू सुवेशसदनौ वलयाङ्गदादि-
शोभास्पदौ दुरितदैत्यविनाशदक्षौ ।
तौ दक्षिणौ भगवतश्च गदासुनाभ-
तेजोजितौ सुललितौ मनसा स्मरामि ॥ १८ ॥
वामौ भुजौ मुररिपोर्धृतपद्मशङ्खौ
श्यामौ करीन्द्रकरवन्मणिभूषणाढ्यौ ।
रत्नाङ्गुलिप्रचयचुम्बितजानुमध्यौ
पद्मालयाप्रियकरौ रुचिरौ स्मरामि ॥ १९ ॥
कण्ठं मृणालममलं मुखपङ्कजस्य
लेखात्रयेण वनमालिकया निवीतम् ।
किंवा विमुक्तिवसमन्त्रकसत्फलस्य
वृन्तं चिरं भगवतः सुभगं स्मरामि ॥ २० ॥
रक्ताम्बुजं दशनहासविकाशरम्यं
रक्ताधरौष्ठवरकोमलवाक्सुधाढ्यम् ।
सम्मानसोज्ज्वचलेक्षणपञ्चचित्रं
श्लोकाभिराममममलञ्च हरेः स्मरामि ॥ २१ ॥

शूरात्मजावसथगन्धविदं सुनाभं
भ्रूपल्लवं स्थितिलयोदयकर्मदक्षम् ।
कामोत्सवञ्च कमलाहृदयप्रकाशं
संचिन्तयामि हरिवक्त्रविलासदक्षम् ॥ २२ ॥
कर्णौ लसन्मकरकुण्डलगण्डलोलौ
नानादिशाञ्च नभसश्च विकासगेहौ ।
लोलालकप्रचयचुम्बनकुञ्चिताग्रौ
लग्नौ हरेर्मणिकिरीटतटे स्मरामि ॥ २३ ॥
भालं विचित्रतिलकं प्रियचारुगन्ध-
गोरोचनारचनया ललनाचित्तसख्यम् ।
ब्रह्मैकधाममणिकान्तकिरीटयुष्टं
ध्यायेन्मनोनयनहारकमीश्वरस्य ॥ २४ ॥
श्रीवासुदेवचिकुरं कुटिलं निबद्धं
नानासुगन्धिकुसुमैः स्वजनादरेण ।
दीर्घं रमाहृदयगाश्रमनं धुनन्तं
ध्यायेऽम्बुवाहरुचिरं हृदयाब्जमध्ये ॥ २५ ॥
मेघाकारं सोमसूर्य्यप्रकाशं सुभ्रूभ्रशं शक्रचापैकमानम् ।
लोकातीतं पुण्डरीकायताक्षं विद्युच्चेलच्चाश्रयेऽहं त्वपूर्वम् ॥२६॥
दीनं हीनं सेवया वेदवत्या पापैस्तापैः पूरितं मे शरीरम् ।
लोभाक्रान्तं शोकमोहाधिविद्धं कृपादृष्ट्या पाहि मां वासुदेव ! २७
ये भक्त्याढ्यां ध्यायमानां मनोज्ञां
व्यक्तिं विष्णोः षोड़शश्लोकपुष्पैः ।
स्तुत्वा नत्वा पूजयित्वा विधिज्ञाः
श्रुत्वा मुक्ता ब्रह्मसौख्यं प्रयान्ति ॥ २८ ॥

पद्मेरितमिदं पुण्यं शिवेन परिभाषितम्।
धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं परम् ॥ २९ ॥
पठन्ति ये महाभागास्ते मुच्यन्तेऽंहसोऽखिलात्।
धर्मार्थकाममोक्षाणां परत्रेह फलप्रदम् ॥ ३० ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये हरिभक्ति-
विवरणं नाम सप्तमोऽध्यायः।
समाप्तश्चायं प्रथमांशः।

द्वितीयांशः।

प्रथमोऽध्यायः।

सूत उवाच। इति पद्मावचः श्रुत्वा कीरो धीरः सतां मतः।
कल्किदूतः सखीमध्ये स्थितां पद्मामथाब्रवीत् ॥ १ ॥
वद पद्मे! साङ्गपूजां हरेरद्भुतकर्मणः।
यामास्थाय विधानेन चरामि भुवनत्रयम् ॥ २ ॥
पद्मोवाच। एवं पादादिकेशान्तं ध्यात्वा तं जगदीश्वरम्।
पूर्णात्मा देशिको मूलं मन्त्रं जपति मन्त्रवित् ॥ ३ ॥
जपादनन्तरं दण्डप्रणतिं मतिमांश्चरेत्।
विश्वक्सेनादिकानान्तु दत्त्वा विष्णुनिवेदितम् ॥ ४ ॥
ततः उद्धास्य हृदये स्नापयेन्मनसा सह।
नृत्यन् गायन् हरेर्नाम तं पश्यन् सर्वतः स्थितम् ॥ ५ ॥
ततः शेषं मस्तकेन कृत्वा नैवेद्यभुग्भवेत्।
इत्येतत् कथितं कीर! कमलानाथसेवनम् ॥ ६ ॥
सकामानां कामपूरमकामामृतदायकम्।
श्रोत्रानन्दकरं देवगन्धर्वनरवृत्प्रियम् ॥ ७ ॥

शुक उवाच । समीरितं श्रुतं साध्वि ! भगवन्नामिलक्षणम् ।
त्वत्प्रसादात् पापिनो मे क्रौरस्य भुवि मुक्तिदम् ॥ ८ ॥
किन्तु त्वां काञ्चनमयीं प्रतिमां रत्नभूषिताम् ।
सजीवामिव पश्यामि दुर्लभां रूपिणीं श्रियम् ॥ ९ ॥
नान्यां पश्यामि सदृशीं रूपशीलगुणैस्तव ।
नान्यो योग्यो गुणी भर्त्ता भुवनेऽपि न दृश्यते ॥ १० ॥
किन्तु पारे समुद्रस्य परमाश्चर्य्यरूपवान् ।
गुणवानीश्वरः साक्षात् कश्चिद् दृष्टोऽतिमानुषः ॥ ११ ॥
न हि धात्रकृतं मन्ये शरीरं सर्वसौभगम् ।
यस्य श्रीवासुदेवस्य नान्तरं ध्यानयोगतः ॥ १२ ॥
त्वया ध्यातं तु यद्रूपं विष्णोरमिततेजसः ।
तत् साक्षात्कृतमित्येव न तत्र कियदन्तरम् ॥ १३ ॥
पद्मोवाच । ब्रूहि तन्मम किं कुत्र जातः क्रौर ! परावरम् ।
जानासि तत्कृतं कर्म्म विस्तरेणात्र वर्णय ॥ १४ ॥
त्वत्तादागच्छ पूजां ते करोमि विधिबोधिताम् ।
बीजपूरफलाहारं कुरु साधु पयः पिब ॥ १५ ॥
तव चक्षुयुगं पद्मरागादारुणमुज्ज्वलम् ।
रत्नसङ्घटितमङ्गं करोमि मनसः प्रियम् ॥ १६ ॥
कन्धरं सूर्य्यकान्तेन मणिना स्वर्णघट्टिना ।
करोम्याच्छादनं चारुमुक्ताभिः पत्त्रतिं तव ॥ १७ ॥
पतत्रं कुङ्कुमेनाङ्गं सौरभेणातिचित्रितम् ।
करोमि नयनानन्ददायकं रूपमीदृशम् ॥ १८ ॥
पुच्छमच्छमणिव्रातघर्घरेणातिशब्दितम् ।
यादयोर्नूपुरालापलापिनं त्वां करोम्यहम् ॥ १९ ॥

तवामृतकथाव्रातत्यक्ताधिं साधि मामिह ।
सखीभि: संगीताभिस्ते किं करिष्यामि तद्वद ॥ २० ॥
इति पद्मावच: श्रुत्वा तदन्तिकमुपागत: ।
कीरो धीर: प्रसन्नात्मा प्रवक्तुमुपचक्रमे ॥ २१ ॥

कीर उवाच । ब्रह्मणा प्रार्थित: श्रीशो महाकारुणिको बभौ
शम्भले विष्णुयशसो गृहे धर्म्मैरिरक्षिषु: ॥ २२ ॥
चतुर्भिर्भ्रातृभिर्भ्रातिगोव्रजै: परिवारित: ।
कृतोपनयनो वेदमधीत्य रामसन्निधौ ॥ २३ ॥
धनुर्वेदञ्च गान्धर्वं शिवादश्वमसिं शुकम् ।
कवचञ्च वरं लब्ध्वा शम्भलं पुनरागत: ॥ २४ ॥
विशाखयूपभूपालं प्राप्य शिक्षा विशेषत: ।
धर्म्मानाख्याय मतिमान् अधर्म्मांश्च निराकरोत् ॥ २५ ॥
इति पद्मा तदाख्यानं निशम्य मुदिताननना ।
प्रस्थापयामास शुकं कल्केरानयनाद्दता ॥ २६ ॥
भूषयित्वा स्वर्णरत्नैस्तमुवाच कृताञ्जलि: ॥ २७ ॥

9627

पद्मोवाच । निवेदितं तु जानासि किमन्यत् कथयाम्यहम् ।
स्त्रीभावभयभीतात्मा यदि नायाति स प्रभु: ॥ २८ ॥
तथापि मे कर्म्मदोषात् प्रणतिं कथमिष्यसि ।
शिवेन यो वरो दत्त: स मे शापोऽभवत् किल ॥ २९ ॥
पुंसां मद्दर्शनेनापि स्त्रीभावं कामत: शुक ! ।
श्रुत्वेति पद्मामामन्त्र्य प्रणम्य च पुन: पुन: ॥ ३० ॥
उड्डीय प्रययौ कीर: शम्भलं कल्किपालितम् ।
तमागतं समाकर्ण्य कल्कि: परपुरञ्जय: ॥ ३१ ॥
क्रोड़े कृत्वा तं ददर्श स्वर्णरत्नविभूषितम् ।

सानन्दं परमानन्ददायकं प्राह तं तदा ॥ ३२ ॥
कल्किः परमतेजस्वी तरस्मिन्नमलं शुकम् ।
पूजयित्वा करे स्पृष्ट्वा पयःपानेन तर्पयन् ॥ ३३ ॥
तन्मुखे स्वमुखं दत्त्वा पप्रच्छ विविधाः कथाः ।
कस्माद्देशाच्चरित्वा त्वं दृष्टापूर्वं किमागतः ? ॥ ३४ ॥
कुत्रोषितः कुतो लब्धं मणिकाञ्चनभूषणम् ।
अहर्निशं त्वन्मिलनं वाञ्छितं मम सर्वतः ॥ ३५ ॥
तवानालोकनेनापि क्षणं मे युगवद्भवेत् ॥ ३६ ॥
इति कल्केर्वचः श्रुत्वा प्रणिपत्य शुको भृशम् ।
कथयामास पद्मायाः कथाः पूर्वोदिता यथा ॥ ३७
संवादमात्मनस्तस्या निजालङ्कारधारणम् ।
सर्वं तद्वर्णयामास तस्याः प्रणतिपूर्वकम् ॥ ३८ ॥
श्रुत्वेति वचनं कल्किः शुकेन सहितो मुदा ।
जगाम त्वरितोऽश्वेन शिवदत्तेन तन्मनाः ॥ ३९ ॥
समुद्रपारममलं सिंहलं जलसंकुलम् ।
नानाविमानबहुलं भास्वरं मणिकाञ्चनैः ॥ ४० ॥
प्रासादसदनाग्रेषु पताकातोरणाकुलम् ।
श्रेणीसभापणाट्टालदुरगोपुरमण्डितम् ॥ ४१ ॥
पुरस्त्रीपद्मिनीपद्मगन्धामोदद्विरेफिणीम् ।
पुरीं कारुमतीं तत्र ददर्श पुरतः स्थिताम् ॥ ४२ ॥
मरालजालसञ्चालविलोलकमलान्तराम् ।
उन्मीलिताब्जमालालिकलिताकुलितं सरः ॥ ४३ ॥
जलकुक्कुटदात्यूहनादितं हंससारसैः ।
ददर्श स्वच्छपयसा लहरीलोलवीजितम् ॥ ४४ ॥

वनं कदम्बकुट्टालशालतालाम्रकेसरैः ।
कपित्थाश्वत्थखर्जूरबीजपूरकरञ्जकैः ॥ ४५ ॥
पुन्नागपनसैर्नागरङ्गैरर्जुनशिंशपैः ।
क्रमुकैर्नारिकेलैश्च नानावृक्षैश्च शोभितम् ।
वनं ददर्श रुचिरं फलपुष्पदलावृतम् ॥ ४६ ॥
दृष्ट्वा हृष्टतनुः शुकं सकरुणः कल्किः पुराऽन्ते वने
प्राह प्रीतिकरं वचोऽत्र सरसि स्नातव्यमित्यादृतः ।
तत् श्रुत्वा विनयान्वितः प्रभुमतं यामीति पद्माश्रमं
तत्सन्देशमिह प्रयाणमधुना गत्वा स कीरोऽवदत् ॥ ४७ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
कल्केरागमनवर्णनं नाम प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

सूत उवाच । कल्किः सरोवराभ्याशे जलाहरणवर्त्मनि ।
स्वच्छस्फटिकसोपाने प्रवालाचितवेदिके ॥ १ ॥
सरोजसौरभव्याप्तभ्रमद्भ्रमरनादिते ।
कदम्बपोतपत्त्रालिवारितादित्यदर्शने ॥ २ ॥
समुवासासने चित्रे सदश्वेनावतारितः ।
कल्किः प्रस्थापयामास शुकं पद्माश्रमं मुदा ॥ ३ ॥
स नागेश्वरमध्यस्थः शुको गत्वा ददर्श ताम् ।
हर्म्यस्थां विषिणीपत्त्रशायिनीं सखीभिर्वृताम् ॥ ४ ॥
निश्वासवप्ततापेन म्लायतीं वदनाम्बुजम् ।
उत्क्षिपन्तीं सखीदत्तकमलं चन्दनोक्षितम् ॥ ५ ॥

रेवावारिपरिस्नातं परागाख्यं समागतम् ।
धृतनीरं रसगतं निन्दन्तीं पवनं प्रियम् ॥ ६ ॥
शुकः सकरुणः साधुवचनैस्तामतोषयत् ।
सा, त्वमेह्येहि, ते स्वस्ति, स्वागतं ? स्वस्ति मे शुभे ! ॥७॥
गते त्वय्यतिव्यग्रां शान्तिस्तेऽस्तु रसायनात् ।
रसायनं दुर्लभं मे, सुलभं ते शिवाश्रमे ॥ ८ ॥
क्व मे भाग्यविहीनायाः ? इहैव वरवर्णिनि ! ।
देवि ! तं सरसस्तीरे प्रतिष्ठाप्यागता वयम् ॥ ९ ॥
एवमन्योऽन्यसंवादमुदितात्ममनोरथे ।
मुखं मुखेन नयनं नयने साहता ददौ ॥ १० ॥
विमला मालिनी लोला कमला कामकन्दला ।
विलासिनी चारुमती कुमुदेत्यष्टनायिकाः ॥ ११ ॥
सख्य एता मतास्ताभिर्जलक्रीड़ार्थमुद्यताः ।
पद्मा प्राह, सरस्तीरमायान्तु सा मया स्त्रियः ॥ १२ ॥
इत्याख्यायाशु शिविकामारुह्य परिवारिता ।
सखीभिश्चारुवेशाभिर्भूत्वा स्वान्तःपुराद्बहिः ।
प्रययौ त्वरितं द्रष्टुं भैक्षी यदुपतिं यथा ॥ १३ ॥

जनाः पुमांसः पथि ये पुरस्थाः
प्रदुद्रुवुः स्त्रीत्वभयात् दिगन्तरम् ।
शृङ्गाटके वा विपणिस्थिता ये
निजाङ्गनास्थापितपुण्यकार्य्याः ॥ १४ ॥

नेवारितां तां शिविकां वहन्त्यः नार्य्योऽतिमत्ता बलवत्तराश्च ।
द्मा शुकोक्त्या तदुपर्य्युपस्था जगाम ताभिः परिवारिताभिः १५॥
रोजलं सारसहंसनादितं प्रफुल्लपद्मोद्भवरेणुवासितम् ।

चेरुर्विगाह्याश्च सुधाकरालसाः कुमुद्वतीनामुदयाय शोभना
तासां मुखामोदमदान्धभृङ्गाः विहाय पद्मानि मुखारविन्दं
लग्नाः सुगन्धाधिकमाकलय्य निवारितश्चापि न तत्यजुस्ते॥
हासोपहासैः सरसप्रकाशैः वाद्यैश्च नृत्यैश्च जले विहारैः ।
करग्रहैस्ता जलयोधनार्त्ताः चकर्ष ताभिर्वनिताभिरुच्चैः ॥१
सा कामतप्ता मनसा शुकोक्तिं विविच्य पद्मा सखिभिः समेत
जलात् समुत्थाय महार्हभूषा जगाम निर्दिष्टकदम्बषण्डम्॥१
सुखे शयानं मणिवेदिकागतं कल्किं पुरस्तादतिसूर्यवर्चसम
महामणिव्रातविभूषणाचितं शुकेन सार्द्धं तमुदैक्षतेशम् ॥२०
तमालनीलं कमलापतिं प्रभुं पीताम्बरं चारुसरोजलोचनम्
आजानुबाहुं पृथुपीनवक्षसं श्रीवत्ससत्कौस्तुभकान्तिराजितम्
तदद्भुतं रूपमवेक्ष्य पद्मा संस्तम्भिता विस्मृतसत्क्रियार्था ।
सुप्तं तु संबोधयितुं प्रवृत्तं निवारयामास विशङ्कितात्मा ॥२२
कदाचिदेषोऽतिबलोऽतिरूपी मद्दर्शनात् स्त्रीत्वमुपैति साक्षात
तदात्र किं मे भविता भवस्य वरेण शापप्रतिमेन लोके ॥२३
चराचरात्मा जगतामधीशः प्रबोधितस्तद्धृदयं विविच्य ।
ददर्श पद्मां प्रियरूपशोभां यथा रमा श्रीमधुसूदनाग्रे ॥ २४
संवीक्ष्य मायामिव मोहिनीं तां जगाद कामाकुलितः स कल्कि
सखीभिरीशां समुपागतां तां कटाक्षविक्षेपविनामितास्याम् २
इहैहि सुखागतमस्तु भाग्यात् समागमस्ते कुशलाय मे स्यात्
तवाननेन्दुः किल कामपूरतापापनोदाय सुखाय कान्ते ! २
लोलाच्चिलावण्यरसामृतं ते कामाहिदष्टस्य विधातुरस्य ।
तनोतु शान्तिं सुकृतेन लभ्या सुदुर्लभां जीवनमाश्रितस्य ॥२
बाहू तवैतौ कुरुतां मनोज्ञौ हृदि स्थितं काममुदन्तवासम् ।

गर्वायतौ चारुनखाङ्कुरेण द्विपं यथा सादिकिदीर्णकुम्भम् २८
तनाविमावुत्थितमस्तकौ ते कामप्रतोदाविव वाससाक्षौ ।
मोरसा भिन्ननिजाभिमानौ सुवर्त्तुलौ व्यादिशतां प्रियं मे २९

कान्तस्य सोपानमिदं वलित्रयं
सूत्रेण लोमावलिलेखलक्षितम् ।
विभाजितं वेदिविलग्नमध्यमे !
कामस्य दुर्गाश्रयमस्तु मे प्रियम् ॥ ३० ॥

भोरु ! सम्भोगसुखाय मे स्यात् नितम्बबिम्बं पुलिनोपमं ते ।
न्वङ्गि ! तन्वंशुकसङ्गशोभं प्रमत्तकामाविमदोद्यमग्नम् ॥३१॥
गदाम्बुजं तेऽङ्गुलिपत्रचित्रितं वरं मरालक्वणनूपुरावृतम् ।
गमाहिदष्टस्य ममास्तु शान्तये हृदि स्थितं सद्मघने सुशोभने ३२

श्रुत्वैतद्वचनामृतं कलिकुलध्वंसस्य कल्केरलं
दृष्ट्वा सत्पुरुषत्वमस्य मुदिता पद्मा सखीभिर्वृता ।
कान्तं क्लान्तमनाः कृताञ्जलिपुटा प्रोवाच तत् सादरं
धीरं धीरपुरस्कृतं निजपतिं नत्वा नमत्कन्धरा ॥ ३३ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे पद्मा-
कल्किसाक्षात्संवादो नाम द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

सूत उवाच । सा पद्मा तं हरिं मत्वा प्रेमगद्गदभाषिणी ।
तुष्टाव व्रीड़िता देवी करुणावरुणालयम् ॥ १ ॥
प्रसीद जगतां नाथ ! धर्म्मधर्म्मन् ! रमापते ! ।
विदितोऽसि विश्वात्मन् ! वशगां त्राहि मां प्रभो ! ॥२॥

धन्याहं कृतपुण्याहं तपोदानजपव्रतैः ।
त्वां प्रतीप्य दुराराध्यं लब्धं तव पदाम्बुजम् ॥ ३ ॥
आज्ञां कुरु पदाम्भोजं तव संस्पृश्य शोभनम् ।
भवनं यामि राजानमाख्यातुं स्वागतं तव ॥ ४ ॥
इति पद्मा रूपसद्मा गत्वा स्वपितरं नृपम् ।
प्रोवाचागमनं कल्केर्विष्णोरंशस्य दौत्यकैः ॥ ५ ॥
सखीमुखेन पद्मायाः पाणिग्रहणकाम्यया ।
हरेरागमनं श्रुत्वा सहर्षोऽभूत् बृहद्रतः ॥ ६ ॥
पुरोधसा ब्राह्मणैश्च पात्रैर्मित्रैः सुमङ्गलैः ।
वाद्यताण्डवगीतैश्च पूजायोजनपाणिभिः ॥ ७ ॥
जगामानयितुं कल्किं सार्द्धं निजजनैः प्रभुः ।
मण्डयित्वा काञ्चमतीं पताकास्वर्णतोरणैः ॥ ८ ॥
ततो जलाशयाभ्यासं गत्वा विष्णुयशःसुतम् ।
मणिवेदिकयासीनं भुवनैकगतिं पतिम् ॥ ९ ॥
घनाघनोपरि यथा शोभन्ते रुचिराण्यहो ।
विद्युदिन्द्रायुधादीनि तथैव भूषणान्युत ॥ १० ॥
शरीरे पीतवासाग्रघोरभासा विभूषितम् ।
रूपलावण्यसदने मदनोद्यमनाशने ॥ ११ ॥
ददर्श पुरतो राजा रूपशीलगुणाकरम् ।
साश्रुः सपुलकः श्रीशं दृष्ट्वा साधु तमर्चयत् ॥ १२ ॥
ज्ञानागोचरमेतन्मे तवागमनमीश्वर ! ।
यथा माद्यादृपुत्रस्य यदुनाथेन कानने ॥ १३ ॥
इत्युक्त्वा तं पूजयित्वा समानीय निजाश्रमे ।
हर्म्याग्रप्रासादसंबाधे स्थापयित्वा ददौ सुताम् ॥१४॥

पद्मां पद्मपलाशाक्षीं पद्मनिलाय पद्मिनीम् ।
पद्मजादेशतः पद्मनाभायादात् यथाक्रमम् ॥ १५ ॥
कल्किर्लब्ध्वा प्रियां भार्यां सिंहले साधुसत्कृतः ।
समुवास विशेषज्ञः समीक्ष्य द्वीपमुत्तमम् ॥ १६ ॥
राजानः स्त्रीत्वमापन्नाः पद्मायाः सखितां गताः ।
द्रष्टुं समीयुस्त्वरिताः कल्किं विष्णुं जगत्पतिम् ॥ १७ ॥
ताः स्त्रियोऽपि तमालोक्य संस्पृश्य चरणाम्बुजम् ।
पुनः पुंस्त्वं समापन्ना रेवास्नानात् तदाज्ञया ॥ १८ ॥
पद्माकल्की गौरकृष्णौ विपरीतान्तरावुभौ ।
बहिःस्फुटौ नीलपीतवासोव्याजेन पश्यतु ॥ ॥ १९ ॥
दृष्ट्वा प्रभावं कल्केस्तु राजानः परमाद्भुतम् ।
प्रणम्य परया भक्त्या तुष्टुवुः शरणार्थिनः ॥ २० ॥
जय जय निजमायया कल्पिताशेषविशेषकल्पनापरिणाम ! जलाप्लुतलोकत्रयोपकरणमाकलय्य मनुमनिग्रस्य पूरितमविज्ञानाविज्ञानाविर्भूतमहामीनशरीर ! त्वं निजभक्तधर्मसेतुसंरक्षणकृतावतारः ॥ २१ ॥

पुनरिह दितिजबलपरिलङ्घितवासवसूदनाहृतजितभुवनपराक्रमहिरण्याक्षनिधनपृथिव्युद्धरणसंकल्पाभिनिवेशेन धृतकोलावतारः पाहि नः ॥ २२ ॥

पुनरिह जलधिमथनाहृतदेवदानवगणमन्दराचलानयनश्याकुलितानां साहाय्येनाहृतचित्त ! पर्वतोद्धरणामृतप्राश्यनरचनावतार ! कूर्माकार ! प्रसीद परेश ! त्वं दीननृपाणाम् ॥ २३

पुनरिह त्रिभुवनजयिनो महाबलपराक्रमस्य हिरण्यकशिपोरर्हितानां देववराणां भयभीतानां कल्याणाय दिति-

सुतवधप्रेप्सुर्ब्रह्मणो वरदानादवध्यस्य न शस्त्रास्त्रतस्त्रिदिवा-स्वर्गमर्त्यपातालतलो देवगन्धर्वविद्याधरनरनागैरिति विचिन्त्य नरहरिरूपेण नखायभिन्नाकल्पदैत्यं त्वमसु क्षत-वानसि ॥ २४ ॥

पुनरिह त्रिजगज्जयिनो बलेः सत्रे शक्रानुजो वटु-वामनो दैत्यसम्मोहनाय त्रिपदभूमियाच्ञाच्छलेन विश्वकाय-स्तदुत्सृष्टजलसंस्पर्शनिवृत्तमनोऽभिलाषस्त्वं भूतले बलेर्दौ-वारिकत्वमङ्गीकृतमुचितं दानफलम् ॥ २५ ॥

पुनरिह हैहयादिक्षुपाणाम् अमितबलपराक्रमाणां नानामदोल्लङ्घितमर्य्यादावर्त्मनां निधनाय भृगुवंशजो जाम-दग्न्यः पितृहोमधेनुहरणप्रवृद्धमन्युवशात् निःसप्तकृत्वो निः-क्षत्रियां पृथिवीं कृतवानसि परशुरामावतारः ॥ २६ ॥

पुनरिह पुलस्त्यवंशावतंसस्य विश्रवसः पुत्रस्य निशा-चरस्य रावणस्य लोकत्रयतापनस्य निधनमुररीकृत्य रवि-कुलजातदशरथात्मजो विश्वामित्रादस्त्राण्युपलभ्य वने सीता-हरणवशात् प्रवृद्धमन्युना अम्बुधिं बाणैर्निबध्य सगणं दश-कन्धरं हतवानसि रामावतारः ॥ २७ ॥

पुनरिह यदुकुलजलधिकलानिधिः सकलसुरगणसेवित-पादारविन्दद्वन्द्वः विविधदानवदैत्यदलनलोकत्रयदुरिततापनो वसुदेवात्मजो रामावतारो बलभद्रस्त्वमसि ॥ २८ ॥

पुनरिह विधिकृतवेदधर्मानुष्ठानविहितमानादर्शनसंभूय-संसारकर्मत्यागविधिना ब्रह्माभासविलासचातुरीं प्रकृति-विमाननामसम्मादयन् बुद्धावतारस्त्वमसि ॥ २९ ॥

अधुना कलिकुलनाशावतारो बौद्धपाषण्डम्लेच्छादीनाञ्च

विदधर्ममेतुपरिपालनाय कृतावतारः कल्किरूपेणास्मान्
स्त्रीत्वनिरयादुद्धृतवानसि तवानुकम्प्यां किमिह कथयामः॥२०

क्व ते ब्रह्मादीनामविदितविलासावतरणं
क्व नः कामा वामाकुलितमृगतृष्णार्त्तमनसाम्।
सुदुष्प्राप्यं युष्मच्चरणजलजानोकममिदं
कृपापारावारः प्रमुदितहृदाश्वासय निजान्॥ २१॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे नृपाणां
स्तवो नाम द्वतीयोऽध्यायः।

चतुर्थोऽध्यायः।

[त उवाच। श्रुत्वा नृपाणां भक्तानां वचनं पुरुषोत्तमः।
ब्राह्मणक्षत्रविट्शूद्रवर्णानां धर्ममाह यत्॥ १॥
प्रवृत्तानां निवृत्तानां कर्म्म यत् परिकीर्त्तितम्।
सर्वं संश्रावयामास वेदानामनुशासनम्॥ २॥
इति कल्केर्वचः श्रुत्वा राजानो विषदाशयाः।
प्रणिपत्य पुनः प्राहुः पूर्वान्तु गतिमात्मनः॥ ३॥
स्त्रीत्वं वाप्यथवा पुंस्त्वं कस्य वा केन वा कृतम्।
जरायौवनबाल्यादिसुखदुःखादिकञ्च यत्॥ ४॥
कस्मात् कुतो वा कस्मिन् वा किमेतदिति वा विभो!!
अनिर्णीतान्यविदितान्यपि कर्म्माणि वर्णय॥ ५॥
(तदा तदाकर्ण्य कल्किरनन्तं मुनिमस्मरत्।)
सोऽप्यनन्तो मुनिवरस्तीर्थपादो दृढव्रतः॥ ६॥
कल्केर्दर्शनतो मुक्तिमाकलय्यागतस्वरन्।
समागत्य पुनः प्राह किं करिष्यामि कुत्र वा।

यास्यामीति वचः श्रुत्वा कल्किः प्राह हसन् मुनिम् ॥७
ज्ञातं दृष्टं त्वया सर्वं श्रुतं यान्निवर्त्तकम् ।
अदृष्टमश्रुतञ्चेति श्रुत्वा हृष्टमना मुनिः ॥ ८ ॥
गमनायोद्यतं तं तु दृष्ट्वा नृपगणास्ततः ।
कल्किं कमलपत्राक्षं प्रोचुर्विस्मितचेतसः ॥ ९ ॥
राजान ऊचुः । किमनेन नापि कथितं त्वया वा किमुताप्युत
सर्वं तत् श्रोतुमिच्छामः कथोपकथनं द्वयोः ॥ १० ॥
नृपाणां तद्वचः श्रुत्वा तानाह मधुसूदनः ।
पृच्छतामुं मुनिं शान्तं कथोपकथनादृताः ॥ ११ ॥
इति कल्केर्वचो भूयः श्रुत्वा ते नृपसत्तमाः ।
अनन्तमाहुः प्रणताः प्रश्नपारतितीर्षवः ॥ १२ ॥
राजान ऊचुः । मुने ! किमत्र कथनं कल्किना धर्म्मवर्म्मणा ।
दुर्बोधः केन वा ज्ञातस्तत्त्वं वर्णय नः प्रभो ! ॥ १३ ॥
मुनिरुवाच । पुरिकायां पुरि पुरा पिता मे वेदपारगः ।
विद्रुमो नाम धर्म्मज्ञः ख्यातः परहिते रतः ॥ १४ ॥
सोमा मम विभो ! माता पतिधर्म्मपरायणा ।
तयोर्वयःपरिणती काले षण्ढाऽतिस्वदुःखदम् ॥ १५ ॥
सञ्जातः शोकदः पित्रोर्लोकानां निन्दिताऽऽकृतिः ।
मामालोक्य पिता क्लीवं दुःखशोकभयाकुलः ॥ १६ ॥
त्यक्त्वा गृहं शिववनं गत्वा तुष्टाव शङ्करम् ।
सम्पूज्येशं विधानेन धूपदीपानुलेपनैः ॥ १७ ॥

विद्रुम उवाच ।

शिवं शान्तं सर्वलोकैकनाथं भूतावासं वासुकीकण्ठभूषम् ।
जटाजूटाबद्धगङ्गातरङ्गं वन्दे सान्द्रानन्दसन्दोहदक्षम् ॥ १८

इत्यादि बहुभिः स्तोत्रैः स्तुतः स शिवदः शिवः ।
हृषारूढः प्रसन्नात्मा पितरं प्राह मे हृष्ण ॥ १८ ॥
विद्रुमो मे पिता प्राह मत् पुंस्त्वं तापतापितः ।
हसन् शिवो ददौ पुंस्त्वं पार्वत्या प्रतिमोदितः ॥ २० ॥
मम पुंस्त्वं वरं लब्ध्वा पितायातः पुनर्गृहम् ।
पुरुषं मां समालोक्य सहर्षः प्रियया सह ॥ २१ ॥
ततः प्रवयसौ तौ तु पितरौ द्वादशाब्दके ।
विवाहं मे कारयित्वा बन्धुभिर्मुदमापतुः ॥ २२ ॥
यज्ञरातसुतां पत्नीं मानिनीं रूपशालिनीम् ।
प्राप्याहं परितुष्टात्मा गृहस्थः स्त्रीवशोऽभवम् ॥ २३ ॥
ततः कतिपये काले पितरौ मे मृतौ नृपाः ! ।
पारलौकिककार्य्याणि सुहृद्भिर्ब्राह्मणैर्हृतः ॥ २४ ॥
तयोः कृत्वा विधानेन भोजयित्वा द्विजान् बहून् ।
पित्रोर्वियोगतप्तोऽहं विष्णुसेवापरोऽभवम् ॥ २५ ॥
तुष्टो हरिर्मे भगवान् जपपूजादिकर्म्मभिः ।
स्वप्ने मामाह मायेयं स्नेहमोहविनिर्मिता ॥ २६ ॥
अयं पितेयं मातेति ममताकुलचेतसाम् ।
शोकदुःखभयोद्वेगजरामृत्युविधायिका ॥ २७ ॥
शृणेति वचनं विष्णोः प्रतिवादार्थमुद्यतम् ।
मामालक्ष्यान्तर्हितः स विनिद्रोऽहं ततोऽभवम् ॥ २८ ॥
सविस्मयः सभार्य्योऽहं त्यक्त्वा तां पुरिकां पुरीम् ।
पुरुषोत्तमाख्यं श्रीविष्णोरालयञ्चागमं नृपाः ! ॥ २९ ॥
तत्रैव दक्षिणे पार्श्वे निर्माय्याश्रममुत्तमम् ।
सभार्यः सानुगामात्यः करोमि हरिसेवनम् ॥ ३० ॥

मायासन्दर्शनाकाङ्क्षी हरिसद्मनि संस्थितः ।
गायन् नृत्यन् जपन् नाम चिन्तयन् शमनापहम् ॥ ३१ ॥
एवं हृत्ते द्वादशाब्दे द्वादश्यां पारणा दिने ।
स्नातुकामः समुद्रेऽहं बन्धुभिः सहितो गतः ॥ ३२ ॥
तत्र मग्नं जलनिधौ लहरीलोलसंकुले ।
समुत्थातुमशक्तं मां प्रतुदन्ति जलेचराः ॥ ३३ ॥
निमज्जनोन्मज्जनेन व्याकुलीकृतचेतसम् ।
जलहिल्लोलमिलनदलिताङ्गमचेतनम् ॥ ३४ ॥
जलधेर्दक्षिणे कूले पतितं पवनेरितम् ।
मां तत्र पतितं दृष्ट्वा हृदयशर्मा द्विजोत्तमः ॥ ३५ ॥
सन्ध्यामुपास्य सतृणः स्वपुरं मां समानयत् ।
स हृदयशर्मा धर्मात्मा पुत्रदारधनान्वितः ।
कृत्वा रुग्नन्तु मां तत्र पुत्रवत् पर्य्यपालयत् ॥ ३६ ॥
अहन्तु तत्र दीनात्मा दिग्देशाभिज्ञ एव न ।
दम्पती तौ स्वपितरौ मत्वा तत्रावसं नृपाः ! ॥ ३७ ॥
स मां विज्ञाय बहुधा वेदधर्मेष्वनुष्ठितम् ।
प्रददौ स्वां दुहितरं विवाहे विनयान्वितः ॥ ३८ ॥
लब्ध्वा चामीकराकारां रूपशीलगुणान्विताम् ।
नाम्ना चारुमतीं तत्र मानिनीं विस्मितोऽभवम् ॥ ३९ ॥
तयाहं परितुष्टात्मा नानाभोगसुखान्वितः ।
जनयित्वा पञ्च पुत्रान् सम्मदेनाहृतोऽभवम् ॥ ४० ॥
जयश्च विजयश्चैव कमलो विमलस्तथा ।
बुध इत्यादयः पञ्च विदितास्तनया मम ॥ ४१ ॥
स्वजनैर्बन्धुभिः पुत्रैर्धनैर्नानाविधैरहम् ।

विदितः पूजितो लोके देवैरिन्द्रो यथा दिवि ॥ ४२ ॥
बुधस्य ज्येष्ठपुत्रस्य विवाहार्थं समुद्यतम् ।
दृष्ट्वा द्विजवरस्तुष्टो धर्मसारो निजां सुताम् ॥ ४३ ॥
दित्सुः कर्माणि वेदज्ञश्चकाराभ्युदयान्यपि ।
वाद्यैर्गीतैश्च नृत्यैश्च स्त्रीगणैः स्वर्णभूषितैः ॥ ४४ ॥
अहञ्च पुत्राभ्युदये पितृदेवर्षितर्पणम् ।
कर्त्तुं समुद्रवेलायां प्रविष्टः परमादरात् ॥ ४५ ॥
वेलालोलायिततनुर्जलादुत्थाय सत्वरः ।
तीरे सखीन् स्नानसन्ध्यापरान् वीक्ष्याहमुन्मनाः ॥४६॥
सद्यः समभवं भूपाः ! द्वादश्यां पारणाहतान् ।
पुरुषोत्तमसंवासान् विष्णुसेवार्थमुद्यतान् ॥ ४७ ॥
तेऽपि मामग्रतः ज्ञात्वा तद्रूपवयसां निधिम् ।
विस्मयाविष्टमनसं दृष्ट्वा मामब्रुवन् जनाः ॥ ४८ ॥
अनन्त ! विष्णुभक्तोऽसि जले किं दृष्टवानिह ।
स्थले वा व्यग्रमनसं लक्षयामः कथं तव ॥ ४९ ॥
पारणं कुरु तद् ब्रूहि त्यक्त्वा विस्मयमात्मनः ।
तानब्रुवमहं नैव किञ्चित् दृष्टं श्रुतं जनाः ! ॥ ५० ॥
कामात्मा तत् क्षपणधीर्मायासन्दर्शनाहृतः ।
तया हरेर्मायया हं मूढो व्याकुलितेन्द्रियः ॥ ५१ ॥
न शर्म्म वेद्मि कुत्रापि स्नेहमोहवशं गतः ।
आत्मनो विस्मृतिरियं को वेद विदितां तु ताम् ॥५२॥
इति भार्याधनागारपुत्रोद्वाहानुरक्तधीः ।
अनन्तोऽहं दीनमना न जाने स्वापसम्मितम् ॥ ५३ ॥
मां वीक्ष्य मानिनी भार्या विवशं मूढवत् स्थितम् ।

क्रन्दन्ती किमहोऽकस्मात् आलपन्ती ममान्तिके ॥५४॥
दृष्ट्वा तां वीक्ष्य तांस्तत्र स्मृत्वा कातरमानसम् ।
हंसोऽप्येको बोधयितुमागतो मां सदुक्तिभिः ॥ ५५ ॥
धीरो विदितसर्वार्थः पूर्णः परमधर्म्मवित् ॥ ५६ ॥
सूर्य्याकारं सत्त्वसारं प्रशान्तं दान्तं शुद्धं लोकशोकक्षयिष्णुम्
ममाग्रे तं पूजयित्वा मदङ्गाः पप्रच्छुस्ते मत्शुभध्यानकामाः

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
अनन्तमायादर्शनं नाम चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

सूत उवाच । उपविष्टे तदा हंसे भिक्षां कृत्वा यथोचिताम्
ततः प्राहुरनन्तस्य शरीरारोग्यकाम्यया ॥ १ ॥
हंसस्तेषां मतं ज्ञात्वा प्राह मां पुरतः स्थितम् ।
तव चारुमती भार्य्या पुत्राः पञ्च बुधादयः ॥ २ ॥
धनरत्नान्वितं सद्म सम्बाधं सौधसंकुलम् ।
त्यक्त्वा कदागतोऽसीह पुत्रोद्वाहदिने न तु ॥ ३ ॥
समुद्रतीरसञ्चारः पुरात् धर्म्मजनाद्गतः ।
निमन्त्र्य मामिहायातः शोकसंविग्नमानसः ॥ ४ ॥
त्वञ्च सप्ततिवर्षीयस्तत्र दृष्टो मया प्रभो ! ।
त्रिंशद्वर्षीयवत् कस्मात् इति मे सम्भ्रमो महान् ॥ ५
इयं भार्य्या सहाया ते न तत्रालोकिता क्वचित् ।
अहं वा क्व कुतस्तस्मात् कथं वा केन काङ्क्षितः ॥ ६
स एव वा न वापि त्वं नाहं वा भिक्षुरेव सः ।
आवयोरिह संयोगश्चेन्द्रजाल इवाभवत् ॥ ७ ॥

त्वं गृहस्थः स्वधर्मस्थो भिक्षुकोऽहं परात्मकः ।
आवयोरिह संवादो बालकोन्मत्तयोरिव ॥ ८ ॥
तस्मादीशस्य मायेयं त्रिजगन्मोहकारिणी ।
ज्ञानाप्राप्याद्वैतलभ्या मन्येऽहमिति भो द्विज ! ॥ ९ ॥
इति भिक्षुः समाश्वास्य यदन्यत् प्राह विस्मितः ।
मार्कण्डेय ! महाभाग ! भविष्यं कथयामि ते ॥१०॥
प्रलये या त्वया दृष्टा पुरुषस्योदराभसि ।
सा माया मोहजनिका पत्न्यानं गणिका यथा ॥ ११ ॥
तमो ह्यनन्तसन्तापा नोदनोद्यतमच्छरी ।
ययेदमखिलं लोकमाद्यत्यावस्थया स्थितम् ॥ १२ ॥
लये लीने त्रिजगति ब्रह्म तन्मात्रतां गतः ।
निरुपाधौ निरालोके सिसृक्षुरभवत् परः ॥ १३ ॥
ब्रह्मण्यपि द्विधाभूते पुरुषप्रकृती स्वया ।
भासा संजनयामास महान्तं कालयोगतः ॥ १४ ॥
कालस्वभावकर्म्मात्मा सोऽहङ्कारस्ततोऽभवत् ।
चिद्वत् विष्णुशिवब्रह्ममयः संसारकारणम् ॥ १५ ॥
तन्मात्राणि ततः पञ्च यन्निरे गुणवन्ति च ।
महाभूतान्यपि ततः प्रकृती ब्रह्मसंश्रयात् ॥ १६ ॥
जाता देवासुरनरा ये चान्ये जीवजातयः ।
ब्रह्माण्डभाण्डसंभारजन्मनाशक्रियात्मिकाः ॥ १७ ॥
मायया मायया जीवपुरुषः परमात्मनः ।
संसारभ्रमणव्यग्रो न वेदात्मगतिं क्वचित् ॥ १८ ॥
अहो बलवती माया ब्रह्माद्या यद्वशे स्थिताः ।
गावो यथा नसि प्रोता गुणबद्धाः खगा इव ॥ १९ ॥

तां मायां गुणमय्यां ये तितीर्षन्ति मुनीश्वराः ।
स्रवन्तीं वासनानद्यां त एवार्थविदो भुवि ॥ २० ॥
शौनक उवाच । मार्कण्डेयो वशिष्ठश्च वामदेवादयोऽपरे ।
श्रुत्वा गुरुवचो भूयः किमाहुः श्रवणादृताः ॥ २१ ॥
राजानोऽनन्तवचनमिति श्रुत्वा सुधोपमम् ।
किंवा प्राहुरतो सूत ! भविष्यमिह वर्णय ॥ २२ ॥
इति तद्वच आश्रुत्य सूतः सत्कृत्य तं पुनः ।
कथयामास कार्त्स्न्येन शोकमोहविघातकम् ॥ २३ ॥
सूत उवाच । तत्रानन्तो भूपगणैः पृष्टः प्राह कृतादरः ।
तपसा मोहनिधनमिन्द्रियाणाञ्च निग्रहम् ॥ २४ ॥
अनन्त उवाच । अतोऽहं वनमासाद्य तपः कृत्वा विधानतः ।
नेन्द्रियाणां न मनसो निग्रहोऽभूत् कदाचन ॥ २५ ॥
वने ब्रह्म ध्यायतो मे भार्य्यापुत्रधनादिकम् ।
विषयश्चान्तरा शश्वत् संस्मारयति मे मनः ॥ २६ ॥
तेषां स्मरणमात्रेण दुःखशोकभयादयः ।
प्रतुदन्ति मम प्राणान् धारणाध्याननाशकाः ॥ २७ ॥
ततोऽहं निश्चितमतिरिन्द्रियाणाञ्च घातने ।
मनसो निग्रहस्तेन भविष्यति न संशयः ॥ २८ ॥
अतो मामिन्द्रियाणाञ्च निग्रहव्यग्रचेतसम् ।
तदधिष्ठातृदेवाश्च दृष्ट्वा मामीयुरञ्जसा ॥ २९ ॥
रूपिणो मामथोचुस्ते भोऽनन्त ! इति ते दश ।
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥ ३० ॥
इन्द्रियाणां वयं देवास्तव देहे प्रतिष्ठिताः ।
नखाग्रकाण्डसंभिन्नान् नास्मान् कर्त्तुमिहार्हसि ॥३१॥

न श्रेयो हि तवानन्त ! मनोनियहकर्मणि ।
छेदने भेदनेऽस्माकं भिन्नमर्म्मा मरिष्यसि ॥ ३२ ॥
अन्धानां वधिराणाञ्च विकलेन्द्रियजीविनाम् ।
वनेऽपि विषयव्यग्रं मानसं लक्षयामहे ॥ ३३ ॥
जीवस्यापि गृहस्थस्य देहो गेहं मनोऽनुगः ।
बुद्धिर्भार्य्या तदनुगा वयमित्यवधारय ॥ ३४ ॥
कर्म्मायत्तस्य जीवस्य मनो बन्धविमुक्तिकृत् ।
संसारयति लुब्धस्य ब्रह्मणो यस्य मायया ॥ ३५ ॥
तस्मान्मनोनियहार्थं विष्णुभक्तिं समाचर ।
सुखमोक्षप्रदा नित्यं दाहिका सर्वकर्म्मणाम् ॥ ३६ ॥
द्वैताद्वैतप्रदानन्दसन्दोहा हरिभक्तिका ।
हरिभक्त्या जीवकोषविनाशस्ते महामते ! ॥ ३७ ॥
परं प्राप्स्यसि निर्वाणं कल्केरालोकनात् त्वया ।
इत्यहं बोधितस्तेन भक्त्या संपूज्य केशवम् ॥ ३८ ॥
कल्किं दिष्टचुरायातः कृष्णं कलिकुलान्तकम् ।
दृष्टं रूपमरूपस्य सृष्टस्तत्पदपल्लवः ।
अपदस्य, श्रुतं वाक्यमवाच्यस्य परात्मनः ॥ ४० ॥
इत्यनन्तः प्रमुदितः पद्मानाथं निजेश्वरम् ।
कल्किं कमलपत्राक्षं नमस्कृत्य ययौ मुनिः ॥ ४१ ॥
राजानो मुनिवाक्येन निर्वाणपदवीं गताः ।
कल्किमभ्यर्च्य पद्माञ्च नमस्कृत्य मुनिव्रताः ॥ ४२ ॥
। उवाच । अनन्तस्य कथामेतामज्ञानध्वान्तनाशिनीम् ।
मायानियन्त्रीं प्रपठन् शृण्वन् बन्धाद्विमुच्यते ॥ ४३ ॥
संसाराब्धिविलासलालसमतिः श्रीविष्णुसेवादरो

भक्त्याख्यानमिदं स्वभेदरहितं निर्माय धर्मात्मना ।
ग्रामोल्लासनिघातखड्गमुदितः सङ्कल्किदुर्गाश्रयः
षड्वर्गं जयतादशेषजगतामालम्बितं वैष्णवः ॥ ४४ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
भगवन्मायानिरसनं नाम पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

सूत उवाच । गते नृपगणे कल्किः पद्मया सह सिंहलात् ।
शम्भलग्रामगमने मतिं चक्रे स्वसेनया ॥ १ ॥
ततः कल्केरभिप्रायं विदित्वा वासवस्वरन् ।
विश्वकर्माणमाहूय वचनञ्चेदमब्रवीत् ॥ २ ॥

इन्द्र उवाच । विश्वकर्मन् ! शम्भले त्वं गृहोद्यानाद्यवहितम् ।
प्रासादहर्म्यसम्बाधं रचय स्वर्णसञ्चयैः ॥ ३ ॥
रत्नस्फटिकवैदूर्य्यनानामणिविनिर्मितैः ।
तत्रैव शिल्पनैपुण्यं तव यच्चास्ति तत् कुरु ॥ ४ ॥
श्रुत्वा हरेर्वचो विश्वकर्मा शर्म निजं स्मरन् ।
शम्भले कमलेशस्य स्वस्त्यादिप्रमुखान् गृहान् ॥ ५ ॥
हंससिंहसुपर्णादिमुखांश्चक्रे स विश्वकृत् ।
उपर्य्युपरि तापघ्नवातायनमनोहरान् ॥ ६ ॥
नानावनलतोद्यानसरोवापीसुशोभितः ।
शम्भलश्चाभवत् कल्केर्यथेन्द्रस्यामरावती ॥ ७ ॥
कल्किस्तु सिंहलाद् द्वीपात् बहिः सेनागणैर्वृतः ।
त्यक्त्वा कावमतीं कूले पाथोधेरकरोत् स्थितिम् ॥ ८ ॥

हृष्टद्रुतस्तु कौमुद्या सहितः स्नेहकातरः ।
पद्मया सहितायास्मै पद्मानाथाय विष्णवे ॥ ९ ॥
ददौ गजानामयुतं लक्षं मुख्यश्च वाजिनाम् ।
रथानाञ्च द्विसाहस्रं दासीनां द्वे शते मुदा ॥ १० ॥
दत्त्वा वासांसि रत्नानि भक्तिस्नेहाश्रुलोचनः ।
तयोर्मुखालोकनेन नाशकत् कियदीरितुम् ॥ ११ ॥
महाविष्णुदम्मती तौ प्रस्थाप्य पुनरागतौ ।
पूजितौ कल्किपद्माभ्यां निजकाश्यमतीं पुरीम् ॥ १२ ॥
कल्किस्तु जलधेरम्भो विगाह्य धृतनागणैः ।
पारं जिगमिषुं दृष्ट्वा जम्बुकं स्तम्भितोऽभवत् ॥ १३ ॥
जलस्तम्भमथालोक्य कल्किः सबलवाहनः ।
प्रययौ पयसां राशेरुपरि श्रीनिकेतनः ॥ १४ ॥
गत्वा पारं शुकं प्राह याहि मे शम्भलालयम् ॥ १५ ॥
विश्वकर्म्मगृहीतं यत्र देवराजाज्ञया बहु ।
सद्म संबाधममलं मन्त्रियार्थं सुशोभनम् ॥ १६ ॥
तत्रापि पित्रोर्ज्ञातीनां स्वस्ति ब्रूया यथोचितम् ।
यदत्राङ्ग ! विवाहादि सर्वं वक्तुं त्वमर्हसि ॥ १७ ॥
पश्चाद् यामि हतस्त्वेतैस्त्वमादौ याहि शम्भलम् ॥ १८ ॥
कल्केर्वचनमाकर्ण्य कीरो धीरस्ततो ययौ ।
आकाशगामी सर्वज्ञः शम्भलं सुरपूजितम् ॥ १९ ॥
सप्तयोजनविस्तीर्णं चातुर्वर्ण्यजनाकुलम् ।
सूर्य्यरश्मिप्रतीकाशं प्रसादाग्रशोभितम् ॥ २० ॥
सर्वर्त्तुसुखदं रम्यं शम्भलं विशलोऽविशत् ॥ २१ ॥
गृहात् गृहान्तरं दृष्ट्वा प्रासादादपि चाम्बरम् ।

वनाद् वनान्तरं तत्र द्रुचाद् द्रुचान्तरं व्रजन् ॥ २२ ॥
शुकः स विष्णुयशसः सदनं मुदितोऽव्रजत् ।
तं गत्वा रुचिरालापैः कथयित्वा प्रियाः कथाः ॥२३॥
कल्केरागमनं प्राह सिंहलात् पद्मया सह ॥ २४ ॥
ततस्त्वरन् विष्णुयशाः समानाय्य प्रजाजनान् ।
विशाखयूपभूपालं कथयामास हर्षितः ॥ २५ ॥
स राजा कारयामास पुरग्रामादिमण्डितम् ।
स्वर्णकुम्भैः सदम्भोधिः पूरितैश्चन्दनोक्षितैः ॥ २६ ॥
कालागुरुसुगन्धाढ्यैर्दीपलाजाङ्कुराञ्चितैः ।
कुसुमैः सुकुमारैश्च रम्भापूगफलान्वितैः ।
शुशुभे शम्भलग्रामो विबुधानां मनोहरः ॥ २७ ॥
तं कल्किः प्राविशद् भीमसेनागणविलक्षणः ।
कामिनीनयनानन्दमन्दिराङ्गः कृपानिधिः ॥ २८ ॥
पद्मया सहितः पित्रोः पदयोः प्रणतोऽपतत् ।
सुमतिर्मुदिता पुत्रं ऋषां शक्रं शचीमिव ।
ददृशे त्वमरावत्यां पूर्णकामा दितिः सती ॥ २९ ॥
शम्भलग्रामनगरी पताकाध्वजशालिनी ।
अवरोधसुजघना प्रासादविपुलस्तनी ।
मयूरचूचुका हंससंघहारमनोहरा ॥ ३० ॥
पटवासोद्योतधूमवसना कोकिलस्वना ।
सहासगोपुरमुखी वामनेत्रा यथाङ्गना ।
कल्किं पतिं गुणवती प्राप्य रेजे तमीश्वरम् ॥ ३१ ॥
स रेमे पद्मया तत्र वर्षपूगानजाश्रयः ।
शम्भले विष्णुयशसः कल्किः कल्मषनाशनः ॥ ३२ ॥

कवेः पत्नी कामकला सुषुवे परमेष्ठिनौ ।
दृष्टकीर्त्तिदृष्टदृवाह महाबलपराक्रमौ ॥ ३३ ॥
प्राज्ञस्य सन्नतिर्भार्य्या तस्यां पुत्रौ बभूवतुः ।
यज्ञविज्ञौ सर्वलोकपूजितौ विजितेन्द्रियौ ॥ ३४ ॥
सुमन्त्रकस्तु मालिन्यां जनयामास शासनम् ।
वेगवन्तश्च साधूनां द्वावेतावुपकारकौ ॥ ३५ ॥
ततः कल्किश्च पद्मायां जयो विजय एव च ।
द्वौ पुत्रौ जनयामास लोकख्यातौ महाबलौ ॥ ३६ ॥
एतैः परिवृतोऽमात्यैः सर्वसम्पत्समन्वितौ ।
वाजिमेधविधानार्थमुद्यतं पितरं प्रभुः ॥ ३७ ॥
समीक्ष्य कल्किः प्रोवाच पितामहमिवेश्वरः ।
दिशां पालान् विजित्याहं धनान्याहृत्य दत्युत ॥ ३८ ॥
कारयिष्याम्यश्वमेधं यामि दिग्विजयाय भोः ! ॥ ३८ ॥
इति प्रणम्य तं प्रीत्या कल्किः परपुरञ्जयः ।
सेनागणैः परिवृतः प्रययौ कीकटं पुरम् ॥ ४० ॥
बुद्धालयं सुविपुलं वेदधर्म्मबहिष्कृतम् ।
पितृदेवार्च्चनाहीनं परलोकविलोपकम् ॥ ४१ ॥
देहात्मवादबहुलं कुलजातिविवर्जितम् ।
धनैः स्त्रीभिर्भक्ष्यभोज्यैः स्वपराभेददर्शिनम् ॥ ४२ ॥
नानाजनैः परिवृतं पानभोजनतत्परैः ॥ ४३ ॥
श्रुत्वा जिनो निजगणैः कल्केरागमनं क्रुधा ।
अक्षौहिणीभ्यां सहितः संबभूव पुराद्बहिः ॥ ४४ ॥
गजरथतुरगैः समाचिता भूः
कनकविभूषणभूषितैर्वराङ्गैः ।

शतशतरथिभिर्धृतास्त्रशस्त्रैः
ध्वजपटराजिनिवारितातपैर्भौ सा ॥ ४५ ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
बुद्धनिग्रहे कीकटपुरगमनं नाम षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

सूत उवाच । ततो विष्णुः सर्वजिष्णुः कल्किः कल्किविनाशनः ।
कालमायास तां सेनां करिणीमिव केशरी ॥ १ ॥
सेनाङ्गनां तां रतिसङ्गरज्ञतीं
रक्ताम्बरस्त्रां विघटतोरुमध्याम् ।
पलायतीं चारुविकीर्णकेशां
विक्रूजतीं प्राह स कल्किनायकः ॥ २ ॥
रे बौद्धाः ! मा पलायध्वं निवर्त्तध्वं रणाङ्गणे ।
युध्यध्वं पौरुषं साधु दर्शयध्वं पुनर्मम ॥ ३ ॥
जिनो हीनबलः कोपात् कल्केराकर्ण्य तद्वचः ।
प्रतियोद्धुं हयारूढः खड्गचर्म्मधरो ययौ ॥ ४ ॥
नानाप्रहरणोपेतो नानायुधविशारदः ।
कल्किना युयुधे धीरो देवानां विस्मयावहः ॥ ५ ॥
शूलेन तुरगं विद्ध्वा कल्किं बाणेन मोहयन् ।
क्रोड़ीकृत्य द्रुतं भूमेर्नाशकत् तोलनाट्टतः ॥ ६ ॥
जिनो विश्वम्भरं ज्ञात्वा क्रोधाकुलितलोचनः ।
चिच्छेदास्य तनुत्राणं कल्केः शस्त्रञ्च दासवत् ॥ ७ ॥
विशाखयूपोऽपि तथा निहत्य गदया जिनम् ।
मूर्च्छितं कल्किमादाय लीलया रथमारुहत् ॥ ८ ॥

लब्धसंज्ञस्तथा कल्कि: सेवकोत्साहदायक: ।
समुत्पत्य रथात् तस्य नृपस्य जिनमाययौ ॥ ८ ॥
शूलव्यथां विहायाजौ महासत्वस्तरङ्गम: ।
रिङ्गणैर्भ्रमणै: पादविक्षेपहननैर्मुहु: ॥ १० ॥
दण्डाघातै: सटाक्षेपैर्बौद्धसेनागणान्तरे ।
निजघान रिपून् कोपात् शतशोऽथ सहस्रश: ॥ ११ ॥
निश्वासवातैरुड्डीय केचिद् द्वीपान्तरेऽपतत् ।
हस्त्यश्वरथसम्बाधा: पतिता रणमूर्धनि ॥ १२ ॥
गर्ग्यो जघ्नु: षष्टिशतं गर्ग्य: कोटिशतायुतम् ।
विशालास्तु सहस्राणां पञ्चविंशं रणे त्वरम् ॥ १३ ॥
अयुते द्वे जघानाजौ पुत्राभ्यां सहित: कवि: ।
दशलक्षं तथा प्राज्ञ: पञ्चलक्षं सुमन्त्रक: ॥ १४ ॥
जिनं प्राह हसन् कल्किस्तिष्ठाग्रे मम दुर्मते ! ।
देवं मां विद्धि सर्वत्र शुभाशुभफलप्रदम् ॥ १५ ॥
महाणजालभिन्नाङ्गो नि:षङ्गो यास्यसि क्षयम् ।
न यावत् पश्य तावत् त्वं बन्धूनां ललितं मुखम् ॥१६॥
कल्केरितीरितं श्रुत्वा जिन: प्राह हसन् बली ।
देवं त्वदृश्यं शास्त्रे ते बधोऽयमुररीकृत: ।
प्रत्यक्षवादिनो बौद्धा वयं यूयं हयास्त्रमा: ॥ १७ ॥
यदि वा देवरूपस्त्वं तथाप्यग्रे स्थिता वयम् ।
यदि भेत्तासि बाणौघैस्तदा बौद्धै: किमत्र ते ॥ १८ ॥
सोपालम्भं त्वया ख्यातं त्वय्येवास्तु स्थिरो भव ।
इति क्रोधाद् बाणजालै: कल्किं घोरै: समाहृणोत् ॥१९॥
स तु बाणमयं वर्षं क्षयं निन्येऽर्कवद्विभम् ॥ २० ॥

ब्राह्मं वायव्यमाग्नेयं पार्जन्यं चान्यदायुधम् ।
कल्केर्दर्शनमात्रेण निष्फलान्यभवत् क्षणात् ॥ २१ ॥
यथोषरे बीजमुप्तं दानमश्रोत्रिये यथा ।
यथा विष्णौ सतां द्वेषात् भक्तिर्येन कृताप्यहो ॥ २२ ॥
कल्किस्तु तं हयारूढमवप्लुत्य करेऽग्रहीत् ।
ततस्तौ पेततुर्भूमौ ताम्रचूडाविव क्रुधा ॥ २३ ॥
पतित्वा स कल्किकचं जग्राह तत्करं करी ॥ २४ ॥
ततः समुत्थितौ व्यग्री यथा चामूरकेशवौ ।
धृतहस्तौ धृतकचौ ऋष्षाविव महाबलौ ।
युयुधाते महावीरौ जिनकल्की निरायुधौ ॥ २५ ॥
ततः कल्की महायोगी पदाघातेन तत्कटिम् ।
विभज्य पातयामास तालं मत्तगजो यथा ॥ २६ ॥
जिनं निपपतितं दृष्ट्वा बोद्धा हाहेति चुक्रुशुः ।
कल्केः सेनागणा विप्रा जघ्नुर्निहतारयः ॥ २७ ॥
जिने निपतिते भ्राता तस्य शुद्धोदनो बली ।
पादचारी गदापाणिः कल्किं हन्तुं द्रुतं ययौ ॥ २८ ॥
कल्किस्तु तं बाणवर्षैः परिवार्य्य समन्ततः ।
जगर्ज परवीरघ्नो गजमाहत्य सिंहवत् ॥ २९ ॥
गदाहस्तं तमालोक्य पत्तिं स धर्म्मवित् कविः ।
पदातिगो गदापाणिस्तस्थौ शुद्धोदनाग्रतः ॥ ३० ॥
स तु शुद्धोदनस्तेन युयुधे भीमविक्रमः ।
गजः प्रतिगजेनेव दन्ताभ्यां सगदावुभौ ॥ ३१ ॥
युयुधाते महावीरौ गदायुद्धविशारदौ ।
क्षतप्रतिक्षतौ मत्तौ नदन्तौ भैरवान् रवान् ॥ ३२ ॥

कपिस्तु गदया शुर्व्यां शुद्धोदनगदां गदम् ।
कराद्पास्याशु तया स्वया वक्षस्यताड़यत् ॥ ३३ ॥
गदाघातेन निहतो वीरः शुद्धोदनो भुवि ।
पतित्वा सहसोत्थाय तं जघ्ने गदया पुनः ॥ ३४ ॥
संताड़ितेन तेनापि शिरसा स्रस्रिवतः कविः ।
न पपात स्थितस्तत्र स्थाणुवद्विह्वलेन्द्रियः ॥ ३५ ॥
शुद्धोदनस्तमालोक्य महासारं रथायुतैः ।
प्राहर्तं तरसा मायादेवीमानेतुमाययौ ॥ ३६ ॥
यस्या दर्शनमात्रेण देवासुरनरादयः ।
निःसाराः प्रतिमाकारा भवन्ति भुवनाश्रयाः ॥ ३७ ॥
बौद्धा शौद्धोदनाद्यास्ते श्रुत्वा तामग्रतः पुनः ।
योद्धुं समागता म्लेच्छकोटिलक्षशतैर्वृताः ॥ ३८ ॥
सिंहध्वजोत्थितरथां फेरुकाकगणावृताम् ।
सर्वास्त्रशस्त्रजननीं षड्वर्गपरिसेवितां ॥ ३९ ॥
नानारूपां बलवतीं त्रिगुणव्यक्तिलक्षिताम् ।
मायां निरीक्ष्य पुरतः कल्किसेना समापतत् ॥ ४० ॥
निःसाराः प्रतिमाकाराः समस्ताः शस्त्रपाणयः ॥ ४१ ॥
कल्किस्तानालोक्य निजान् भ्रातृज्ञातिसुहृज्जनान् ।
मायया जायया जीर्णान् विभुरासीत् तदग्रतः ॥ ४२ ॥
तामालोक्य वरारोहां स्त्रीरूपां हरिरीश्वरः ।
सा प्रियेव तमालोक्य प्रविष्टा तस्य विग्रहे ॥ ४३ ॥
तामनालोक्य ते बौद्धा मातरं कतिधा वराः ।
रुरुदुः संघशो दीनाः क्षीणस्खबलपौरुषाः ॥ ४४ ॥
विस्मयाविष्टमनसः क्व गतेयमथाब्रुवन् ।

कल्किः समालोकनेन समुत्थाप्य निजान् जनान् ॥४५॥
निघातमसिमादाय म्लेच्छान् हन्तुं मनो दधे ।
सन्नद्धं तुरगारूढं दृढहस्तधृतशरम् ॥ ४६ ॥
धनुर्निषङ्गमनिशं बाणजालप्रकाशितम् ।
धृतहस्ततनुत्राणगोधाङ्गुलिविराजितम् ॥ ४७ ॥
मेघोपर्य्युप्ततारामं दंशनस्वर्णविन्दुकम् ।
किरीटकोटिविन्यस्तमणिराजिविराजितम् ॥ ४८ ॥
कामिनीनयनानन्दसन्दोहरसमन्दिरम् ।
विपक्षपक्षविक्षेपक्षिप्तरक्षकटाक्षकम् ॥ ४९ ॥
निजभक्तजनोल्लाससंवासचरणाम्बुजम् ।
निरीक्ष्य कल्किं ते बौद्धास्तत्रसु धर्म्मनिन्दकाः ॥ ५० ॥
अक्रुधुः सुरसङ्घाः खे यागाहुतिहुताशनाः ॥ ५१ ॥
सुबलमिलनहर्षः शत्रुनाशैकतर्षः
समरवरविहारः साधुसत्कारकाशः ।
स्वजनदुरितहर्त्ता जीवजातस्य भर्त्ता
रचयतु कुशलं वः कामपूरावतारः ॥ ५२ ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये द्वितीयांशे
बौद्धयुद्धो नाम सप्तमोऽध्यायः ।
समाप्तोऽयं द्वितीयांशः ।

तृतीयांशः ।

प्रथमोऽध्यायः ।

सूत उवाच । ततः कल्किर्म्लेच्छगणान् करवालेन कालितान् ।
बाणैः संताड़ितानन्यान् अनयद् यमसद्मनि ॥ १ ॥

विशाखयूपोऽपि तथा कविप्राज्ञसुमन्त्रकाः ।
गार्ग्यभार्ग्यविशालाद्या म्लेच्छान् निघ्नुर्यमक्षयम् ॥ २ ॥
कपोतरोमा काकाक्षः काकजङ्घादयोऽपरे ।
बौद्धाः शौद्धोदना याता युयुधुः कल्किसैनिकैः ॥ ३ ॥
तेषां युद्धमभूद् घोरं भयदं सर्वदेहिनाम् ।
भूतेशानन्दजनकं रुधिरारुणकर्दमम् ॥ ४ ॥
गजाश्वरथसंघानां पततां रुधिरस्रवैः ।
स्रवन्ती केशशैवाला वाजिग्राह्या सुगाहिका ॥ ५ ॥
धनुस्तरङ्गा दुष्पारा गजरोधः प्रवाहिणी ।
शिरःकूर्म्मा रथतरिः पाणिमीनासृगापगा ॥ ६ ॥
प्रवृत्ता तत्र बहुधा हर्षयन्ती मनस्विनाम् ।
दुन्दुभेरवा फेरुशकुनानन्ददायिनी ॥ ७ ॥
गजैर्गजा नरैरश्वाः खरैरुष्ट्रा रथै रथाः ।
निपेतुर्बाणभिन्नाङ्गाः छिन्नबाह्वङ्घ्रिकन्धराः ॥ ८ ॥
भस्मना गुण्ठितमुखा रक्तवस्त्रा निवारिताः ।
विकीर्णकेशाः परितो यान्ति सन्न्यासिनो यथा ॥ ९ ॥
व्यग्राः केऽपि पलायन्ते याचन्त्यन्ये जलं पुनः ।
कल्किसेनाशुगक्षुण्णा म्लेच्छा नो शर्म्म लेभिरे ॥ १० ॥
तेषां स्त्रियो रथारूढ़ा गजारूढ़ा विहङ्गमैः ।
समारूढ़ा हयारूढ़ाः खरोष्ट्रवृषवाहनाः ॥ ११ ॥
योद्धुं समाययुस्त्यक्ता पत्यापत्य सुखाश्रयान् ।
रूपवत्यो युवत्योऽतिबलवत्यः पतिव्रताः ॥ १२ ॥
नानाभरणभूषाढ्याः सन्नद्धा विशदप्रभाः ।
खड्गशक्तिधनुर्बाणवलयाक्तकराम्बुजाः ॥ १३ ॥

स्वैरिण्योऽप्यतिकामिन्यो पुंश्चल्यश्च पतिव्रताः ।
ययुर्योद्धुं कल्किसैन्यैः पतीनां निधनातुराः ॥ १४ ॥
सूत्रस्रकाष्ठचित्राणां प्रभुताम्नायशासनात् ।
साक्षात् पतीनां निधनं किं युवत्योऽपि सेहिरे ॥ १५ ॥
ताः स्त्रियः स्वपतीन् बाणभिन्नान् व्याकुलितेन्द्रियान् ।
हत्वा पश्चाद् युयुधिरे कल्किसैन्यैर्धृतायुधाः ॥ १६ ॥
ताः स्त्रीरूपेण ते सर्वे विस्मयस्मितमानसाः ।
कल्किमागत्य ते योधाः कथयामासुरादरात् ॥ १७ ॥
स्त्रीणामेव युयुत्सूनां कथाः श्रुत्वा महामतिः ।
कल्किः समुदितः प्रायात् स्वसैन्यैः सानुगो रथैः ॥ १८ ॥
ताः समालोक्य पद्मेशः सर्वशस्त्रास्त्रधारिणीः ।
नानावाहनसंरूढाः हतव्यूहा उवाच सः ॥ १९ ॥

कल्किरुवाच । रे स्त्रियः ! शृणुतास्माकं वचनं पथ्यमुत्तमम् ।
स्त्रिया युद्धेन किं पुंसां व्यवहारोऽत्र विद्यते ॥ २० ॥
मुखेषु चन्द्रविम्बेषु राजितालकपङ्क्तिषु ।
प्रहरिष्यन्ति के तत्र नयनानन्ददायिषु ॥ २१ ॥
विभ्रान्ततारभ्रमरं नवकोकनदप्रभम् ।
दीर्घापाङ्गेक्षणं यत्र तत्र कः प्रहरिष्यति ॥ २२ ॥
वक्षोजशम्भू सत्तारहारव्यालविभूषितौ ।
कन्दर्पदर्पदलनौ तत्र कः प्रहरिष्यति ॥ २३ ॥
लोललीलालकव्रातचकोराक्रान्तचन्द्रिकम् ।
मुखचन्द्रं चिरच्छिन्नं कस्तं छेत्तुमिहार्हति ॥ २४ ॥
स्तनभारभराक्रान्तनितान्तक्षीणमध्यमम् ।
तनुलोमलताबन्धं कः पुमान् प्रहरिष्यति ॥ २५ ॥

नेत्रानन्देन नेत्रेण समावृतमनिन्दितम् ।
जघनं सुघनं रम्यं बाणैः कः प्रहरिष्यति ॥ २६ ॥
इति कल्केर्वचः श्रुत्वा प्रहस्य प्राहुराहताः ।
अस्माकं त्वं पतीन् हंसि तेन नष्टा वयं विभो ! ।
हन्तुं गतानामस्त्राणि कराग्रेवागतान्युत ॥ २७ ॥
खड्गशक्तिधनुर्बाणशूलतोमरयष्टयः ।
ताः प्राहुः पुरतो मूर्त्ताः कार्त्तस्वरविभूषणाः ॥ २८ ॥
स्त्रीष्वूचुः । यमासाद्य वयं नार्य्यो हिंसयामः स्वतेजसा ।
तमात्मानं सर्वमयं जानीत कृतनिश्चयाः ॥ २९ ॥
तमीशमात्मना नार्य्यः ! चरामो यदनुग्रया ।
यत् कृता नामरूपादिभेदेन विदिता वयम् ॥ ३० ॥
रूपगन्धरसस्पर्शशब्दाद्या भूतपञ्चकाः ।
चरन्ति यदधिष्ठानात् सोऽयं कल्किः परात्मकः ॥ ३१ ॥
कालस्वभावसंस्कारनामाद्या प्रकृतिः परा ।
यस्येच्छया सृजत्यण्डं महाहङ्कारकादिकान् ॥ ३२ ॥
यन्मायया जगद्यात्रा सर्गस्थित्यन्तसंज्ञिता ।
य एवाद्यः स एवान्ते तस्यायः सोऽयमीश्वरः ॥ ३३ ॥
असौ पतिर्मे भार्याहमस्य पुत्रास्तबान्धवाः ।
स्वप्नोपमास्तु तन्निष्ठा विविधास्त्वैन्द्रजालवत् ॥ ३४ ॥
स्नेहमोहनिबन्धानां यातायातदृशां मतम् ।
न कल्किसेविनां रागद्वेषविद्वेषकारिणाम् ॥ ३५ ॥
कुतः कालः कुतो मृत्युः क्व यमः क्वास्ति देवता ।
स एव कल्किर्भगवान् मायया बहुलीकृतः ॥ ३६ ॥
न शस्त्राणि वयं नार्यः संप्रहार्य्या न च क्वचित् ।

अस्मत्प्रहर्त्तृभेदोऽयमविवेकः परात्मनः ॥ ३७ ॥
कल्किदासस्यापि वयं हन्तुं नार्हाः कथाद्भुतम्।
हनिष्यामो दैत्यपतेः प्रह्लादस्य यथा हरिम् ॥ ३८ ॥
इत्यस्त्राणां वचः श्रुत्वा स्त्रियो विस्मितमानसाः।
म्लेच्छमोहविनिर्मुक्तास्तं कल्किं शरणं ययुः ॥ ३९ ॥
ताः समालोक्य पद्मेशः प्रणता ज्ञाननिष्ठया।
प्रोवाच प्रहसन् भक्तियोगं कल्मषनाशनम् ॥ ४० ॥
कर्म्मयोगञ्चात्मनिष्ठं ज्ञानयोगं भिदाश्रयम्।
नैष्कर्म्मालक्षणं तासां कथयामास माधवः ॥ ४१ ॥
ताः स्त्रियः कल्किगदितज्ञानेन विजितेन्द्रियाः।
भक्त्या परमवापुस्तत् योगिनां दुर्लभं पदम् ॥ ४२ ॥

दत्त्वा मोक्षं म्लेच्छबौद्धप्रियाणां
कृत्वा युद्धं भैरवं भीमकर्म्मा।
हत्वा बौद्धान् म्लेच्छसंघांश्च कल्कि-
स्तेषां ज्योतिः स्थानमापूर्य्य रेजे ॥ ४३ ॥

ये शृण्वन्ति वदन्ति बौद्धनिधनं म्लेच्छक्षयं सादरात्
लोकाः शोकहरं सदा शुभकरं भक्तिप्रदं माधवे।
तेषामेव पुनर्न जन्ममरणं सर्वार्थसम्पत्करं
मायामोहविनाशनं प्रतिदिनं संसारतापच्छिदम् ॥ ४४

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
म्लेच्छनिधनं नाम प्रथमोऽध्यायः।

द्वितीयोऽध्यायः ।

सूत उवाच ।

ततो वीरान् म्लेच्छगणान् विजित्य सह सैनिकैः ।
धनान्यादाय रत्नानि कीकटात् पुनराव्रजत् ॥ १ ॥
कल्किः परमतेजस्वी धर्म्माणां परिरक्षकः ।
चक्रतीर्थं समागत्य स्नानं विधिवदाचरत् ॥ २ ॥
भ्रातृभिर्लोकपालाभैर्बन्धुभिः स्वजनैर्वृतः ।
समायातान् मुनींस्तत्र ददृशे दीनमानसान् ॥ ३ ॥
समुद्रियागतांस्तत्र परिपाहि जगत्पते ।।
इत्युक्तवन्तो बहुधा ये तानाह हरिः परः ॥ ४ ॥
बालखिल्यादिकानल्पकायान् चीरजटाधरान् ।
विनयावनतः कल्किस्तानाह कृपणान् भयात् ॥ ५ ॥
कस्माद् यूयं समायाताः केन वा भीषिता वत ।
तमहं निहनिष्यामि यदि वा स्यात् पुरन्दरः ॥ ६ ॥
इत्याश्रुत्य कल्किवाक्यं तेनोल्लासितमानसाः ।
जगदुः पुण्डरीकाक्षं निकुम्भदुहितुः कथाः ॥ ७ ॥
मुनय ऊचुः । शृणु विष्णुयशः पुत्र ! कुम्भकर्णात्मजात्मजा ।
कुथोदरीति विख्याता गगनार्ध्वसमुत्थिता ॥ ८ ॥
कालकञ्जस्य महिषी विकञ्जजननी च सा ।
हिमालये शिरः कृत्वा पादौ च निषधाचले ।
शेते स्तनं पाययन्ती विकञ्जं प्रसृतस्तनी ॥ ९ ॥
तस्या निश्वासवातेन विवशा वयमागताः ।
दैवेनैव समानीताः सम्प्राप्तास्त्वत्पदास्पदम् ।
मुनयो रक्षणीयास्ते रक्षःसु च विपक्षु च ॥ १० ॥

इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः ।
सेनागणैः परिवृतो जगाम हिमवद्गिरिम् ॥ ११ ॥
उपत्यकां समासाद्य निशामेकां निनाय सः ।
प्रातर्जिगमिषुः सैन्यैर्ददृशे क्षीरनिम्नगाम् ॥ १२ ॥
शङ्खेन्दुधवलाकारां फेनिलां वहतीं द्रुतम् ।
चलन्तीं वीक्ष्य ते सर्वे स्तम्भिता विस्मयान्विताः ॥ १३
सेनागणमजाश्वादिरथयोधैः समावृतः ।
कल्किस्तु भगवांस्तत्र ज्ञातार्थोऽपि मुनीश्वरान् ॥ १४ ॥
पप्रच्छ का नदी चेयं कथं दुग्धवहाभवत् ।
ते कल्केस्तु वचः श्रुत्वा मुनयः प्राहुरादरात् ॥ १५ ॥
शृणु कल्के ! पयस्त्वाः प्रभवं हिमवद्गिरौ ।
समायाता कुथोदर्य्याः स्तनप्रस्रवनादिह ॥ १६ ॥
घटिकासप्तकैः चान्या पयो यास्यति वेगितम् ।
हीनसारा तटाकारा भविष्यति महामते ! ॥ १७ ॥
इति श्रुत्वा मुनीनान्तु वचनं सैनिकैः सह ।
अहो ! किमस्या रात्र्यास्तु स्तनादेका स्त्रियं नदी ॥१
एकं स्तनं पाययति विकङ्कं पुत्रमादरात् ।
न जानेऽस्याः शरीरस्य प्रमाणं कति वा भवेत् ॥ १८
बलं वास्या निशाचर्य्या इत्यूचुर्विस्मयान्विताः ।
कल्किः परात्मा सन्नह्य सेनाभिः सहसा ययौ ॥ २०
मुनिदर्शितमार्गेण यत्रास्ते सा निशाचरी ।
पुत्रं स्तनं पाययन्ती गिरिमूर्ध्नि घनोपमा ॥ २१ ॥
श्वासवातातिवातेन दूरक्षिप्तवनद्विपाः ।
यस्याः कर्णविलावासं प्रसुप्ताः सिंहसङ्कुलाः ॥ २२ ॥

पुत्रपौत्रपरिवृता गिरिगह्वरविभ्रमाः ।
केशमूलमुपालम्ब्य हरिणा शेरते चिरम् ॥ २३ ॥
यूका इव न च व्यग्रा लुब्धजातङ्क्या भृशम् ।
तामालोक्य गिरेर्मूर्ध्नि गिरिवत् परमाद्भुताम् ।
कल्किः कमलपत्राक्षः सर्वांस्तानाह सैनिकान् ॥ २४ ॥
भयोद्विग्नान् बुद्धिहीनान् त्यक्तोद्यमपरिच्छदान् ॥ २५ ॥
कल्किरुवाच । गिरिदुर्गं वह्निदुर्गं कृत्वा तिष्ठन्तु मामकाः ।
गजाश्वरथयोधा ये समायान्तु मया सह ॥ २६ ॥
अहं स्वल्पेन सैन्येन यास्यस्याः सम्मुखं शनैः ।
प्रहर्त्तुं बाणसन्दोहैः खड्गशक्तिपरश्वधैः ॥ २७ ॥
इत्युक्त्वा स्थाप्य पश्चात् तान् बाणैस्तां समहनद् बली ।
सा क्रुधोत्थाय सहसा ननर्द परमाद्भुतम् ॥ २८ ॥
तेन नादेन महता वित्रस्ताश्चाभवन् जनाः ।
निपेतुः सैनिकाः सर्वे मूर्च्छिता धरणीतले ॥ २८ ॥
सा रथांश्च गजांश्चापि विवृतास्या भयानका ।
जघास प्रश्वासवातैः समानीय कुक्षोदरी ॥ ३० ॥
सेनागणास्तदुदरं प्रविष्टाः कल्किना सह ।
यथर्क्षमुखवातेन प्रविशन्ति पिपीलिकाः ॥ ३१ ॥
तद् दृष्ट्वा देवगन्धर्वा हाहाकारं प्रचक्रिरे ।
तत्रस्था मुनयः शेपुर्जेपुश्चान्ये महर्षयः ॥ ३२ ॥
निपेतुरन्ये दुःखार्त्ता ब्राह्मणा ब्रह्मवादिनः ।
रुरुदुः शिष्टयोधा ये जह्रुस्तन्निशाचराः ॥ ३३ ॥
जगतां कदनं दृष्ट्वा सस्मारात्मानमात्मना ।
कल्किः कमलपत्राक्षः सुरारातिनिसूदनः ॥ ३४ ॥

बाणाग्निं चेलचर्माभ्यां कर्मनैर्याणदारुभिः ।
प्रज्वाल्योदरमध्येन करवालं समाददे ॥ ३५ ॥
तेन खड्गेन महता दार्ष्यं निर्भिद्य बन्धुभिः ।
बलिभिर्भ्रातृभिर्वीरैर्वृतः शस्त्रास्त्रपाणिभिः ॥ ३६ ॥
बहिर्बभूव सर्वेशः कल्किः कल्कविनाशनः ।
सहस्राक्षो यथा वज्रकुक्षिं दम्भोलिनेमिना ॥ ३७ ॥
योनिरन्ध्राद् गजरथास्तुरगाश्चाभवन् बहिः ।
नासिकाकर्णविवरात् केऽपि तस्याः विनिर्गताः ॥ ३८ ।
ते निर्गतास्ततस्तस्याः सैनिका रुधिरोक्षिताः ।
तां विध्यधुर्निक्षिपन्तीं तरसा चरणौ करौ ॥ ३९ ॥
ममार सा भिन्नदेहा भिन्नकुक्षिशिरोधरा ।
नादयन्तीं दिशो द्यौः खं चूर्णयन्ती च पर्वतान् ॥ ४० ।
विकङ्कोऽपि तथा वीक्ष्य मातरं कातरोऽभवत् ।
स विकङ्कः क्रुधा धावन् सेनामध्ये निरायुधः ॥ ४१ ॥
गजमालाकुलो वक्षोवाजिराजिविभूषणः ।
महासर्पकृतोष्णीषः केशरिमुद्रिताङ्गुलिः ॥ ४२ ॥
ममर्द कल्किसेनां तां मातुर्व्यसनकर्षितः ।
स कल्किस्तं ब्रह्मास्त्रं रामदत्तं जिघांसया ॥ ४३ ॥
धनुषा पञ्चवर्षीयं राक्षसं शस्त्रमाददे ।
तेनास्त्रेण शिरस्तस्य छित्वा भूमावपातयत् ॥ ४४ ॥
रुधिरार्द्रं धातुचित्रं गिरिशृङ्गमिवाद्भुतम् ।
सपुत्रां राक्षसीं हत्वा मुनीनां वचनाद्विभुः ॥ ४५ ॥
गङ्गातीरे हरिद्वारे निवासं समकल्पयत् ।
देवानां कुसुमासारैर्मुनिस्तोत्रैः सुपूजितः ॥ ४६ ॥

निनाय तां निशां तत्र कल्किः परिजनावृतः ।
प्रातर्ददर्श गङ्गायास्तीरे मुनिगणान् बहून् ।
तस्याः स्नानव्याजविष्णोरात्मनो दर्शनाकुलान् ॥ ४७ ॥

हरिद्वारे गङ्गातटनिकटपिण्डारकवने
वसन्तं श्रीमन्तं निजगणवृतं तं मुनिगणाः ।
स्तवैः स्तुत्वा स्तुत्वा विधिवदुदितैर्जह्नुतनयां
प्रपश्यन्तं कल्किं मुनिजनगणा द्रष्टुमगमन् ॥ ४८ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कुथोदरी-
बधानन्तरं मुनिदर्शनं नाम द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

सूत उवाच। सुखागतान् मुनीन् दृष्ट्वा कल्किः परमधर्मवित्।
पूजयित्वा च विधिवत् सुखासीनानुवाच तान् ॥ १ ॥
कल्किरुवाच । के यूयं सूर्य्यसङ्काशा मम भाग्यादुपस्थिताः ।
तीर्थाटनोत्सुका लोकत्रयाणामुपकारकाः ॥ २ ॥
वयं लोके पुण्यवन्तो भाग्यवन्तो यशस्विनः ।
यतः कृपाकटाक्षेण युष्माभिरवलोकिताः ॥ ३ ॥
ततस्ते वामदेवोऽत्रिर्वशिष्ठो गालवो भृगुः ।
पराशरो नारदोऽश्वत्थामा रामः कृपस्तितः ॥ ४ ॥
दुर्वासा देवलः कण्वो वेदप्रमितिरङ्गिराः ।
एते चान्ये च बहवो मुनयः संशितव्रताः ॥ ५ ॥
कृत्वाग्रे मरुदेवापी चन्द्रसूर्य्यकुलोद्भवौ ।
राजानौ तौ महावीर्य्यौ तपस्याभिरतौ चिरम् ॥ ६ ॥
ऊचुः प्रहृष्टमनसः कल्किं कल्किविनाशनम् ।

महोदधेस्तीरगतं विष्णुं सुरगणा यथा ॥ ७ ॥

मुनय ऊचुः । जयाशेषजगन्नाथ ! विदिताखिलमानस ! ।
सृष्टिस्थितिलयाध्यक्ष ! परमात्मन् ! प्रसीद नः ॥ ८ ॥
कालकर्म्मगुणावास ! प्रसारितनिजक्रिय ! ।
ब्रह्मादिनुतपादाब्ज ! पद्मानाथ ! प्रसीद नः ॥ ९ ॥
इति तेषां वचः श्रुत्वा कल्किः प्राह जगत्पतिः ।
कावेतौ भवतामग्रे महासत्त्वौ तपस्विनौ ॥ १० ॥
कथमत्रागतौ स्तुत्वा गङ्गां मुदितमानसौ ।
का वा स्तुतिस्तु जाह्नव्या युवयोर्नामनी च के ॥ ११ ॥
तयोर्मरुः प्रमुदितः कृताञ्जलिपुटः कृती ।
आदावुवाच विनयी निजवंशानुकीर्त्तनम् ॥ १२ ॥

मरुरुवाच। सर्वं वेत्सि परात्मापि अन्तर्यामिन्! हृदि स्थितः।
तवाज्ञया सर्वमेतत् कथयामि शृणु प्रभो ! ॥ १३ ॥
तव नाभेरभूद् ब्रह्मा मरीचिस्तत्सुतोऽभवत् ।
ततो मनुस्तत्सुतोऽभूदिक्ष्वाकुः सत्यविक्रमः ॥ १४ ॥
युवनाश्व इति ख्यातो मान्धाता तत्सुतोऽभवत् ।
पुरुकुत्सस्तत्सुतोऽभूदनरण्यो महामतिः ॥ १५ ॥
त्रसदस्युः पिता तस्मात् हर्य्यश्वस्त्यरुणस्ततः ।
त्रिशङ्कुस्तत्सुतो धीमान् हरिश्चन्द्रः प्रतापवान् ॥१६॥
हरितस्तत्सुतस्तस्मात् भरुकस्तत्सुतो वृकः ।
ततसुतः सगरस्तस्मादसमञ्जास्ततोऽंशुमान् ॥ १७ ॥
ततो दिलीपस्तत्पुत्रो भगीरथ इति स्मृतः ।
येनानीता जाह्नवीयं ख्याता भागीरथी भुवि ।
स्तुता नुता पूजितेयं तव पादसमुद्भवा ॥ १८ ॥

भगीरथात् सुतस्तस्माच्चाभस्तस्मादभूद् बली ।
सिन्धुद्वीपसुतस्तस्मात् अयुतायुस्ततोऽभवत् ॥ १८ ॥
ऋतुपर्णस्तत्सुतोऽभूत् सुदासस्तत्सुतोऽभवत् ।
सौदासस्तत्सुतो धीमानश्मकस्तत्सुतो मतः ॥ २० ॥
मूलकात् स दशरथस्तस्मादैड़विड़स्ततः ।
राजा विश्वसहस्तस्मात् खट्वाङ्गो दीर्घबाहुकः ॥ २१ ॥
ततो रघुरजस्तस्मात् सुतो दशरथः क्षती ।
तस्माद्रामो हरिः साक्षादाविर्भूतो जगत्पतिः ॥ २२ ॥
रामावतारमाकर्ण्य कल्किः परमहर्षितः ।
मरुं प्राह विस्तरेण श्रीरामचरितं वद ॥ २३ ॥
मरुरुवाच । सीतापतेः कर्म्म वक्तुं कः समर्थोऽस्ति भूतले ।
शेषः सहस्रवदनैरपि लालायितो भवेत् ॥ २४ ॥
तथापि शेमुषी मेऽस्ति वर्णयामि तवाज्ञया ।
रामस्य चरितं पुण्यं पापतापप्रमोचनम् ॥ २५ ॥
अजादिविबुधार्थितोऽजनि चतुर्भिरंशैः कुले
रवेरजसुतादजो जगति यातुधानक्षयः ।
शिशुः कुशिकजाध्वरक्षयकरक्षयो यो बलाद्
बलीललितकन्धरो जयति जानकीवल्लभः ॥ २६ ॥
मुनेरनु सहानुजो निखिलशस्त्रविद्यातिगो
ययावतिवनप्रभो जनकराजराजत्सभाम् ।
विधाय जनमोहनद्युतिमतीव कामद्रुहः
प्रचण्डकरचण्डिमा भवनभञ्जने जन्मनः ॥ २७ ॥
तमःप्रतिमतेजसं दशरथात्मजं सानुजं
मुनेरनु यथाविधेः शशिवदादिदेवं परम् ।

निरीक्ष्य जनको मुदा क्षितिसुतापतिं सम्मतं
निजोचितपणच्छमं मनसि भर्तुसयत्नाययौ ॥ २८ ॥
स भूपपरिपूजितो जनकजेक्षितैरर्चितः
करालकठिनं धनुः करसरोरुहे संहितम् ।
विभज्य बलवद् दृढं जय रघूद्वहेत्युच्चकै-
र्ध्वनिं त्रिजतोगतं परिविधाय राज्ञो बभौ ॥ २९ ॥
ततो जनकभूपतिर्दशरथात्मजेभ्यो ददौ
चतस्र उषतीर्मुदा वरचतुर्भ उद्वाहने ।
स्वलङ्कृतनिजात्मजाः पथि ततो बलं भार्गव-
स्यकार उररी निजं रघुपतौ महोग्रं त्यजन् ॥ ३० ॥
ततः स्वपुरमागतो दशरथस्तु सीतापतिं
नृपं सचिवसंयुतो निजविचित्रसिंहासने ।
विधातुममलप्रभं परिजनैः क्रियाकारिभिः
समुद्यतमतिं तदा द्रुतमवारयत् कैकयी ॥ ३१ ॥
ततो गुरुनिदेशतो जनकराजकन्यायुतः
प्रयाणमकरोत् सुधीर्यदनुगः सुमित्रासुतः ।
वनं निजगणं त्यजन् गुहगृहे वसन्नादरात्
विसृज्य नृपलाञ्छनं रघुपतिर्जटाचीरभृत् ॥ ३२ ॥
प्रियानुजयुतस्ततो मुनिमतो वने पूजितः
स पञ्चवटिकाश्रमे भरतमातुरं सङ्गतम् ।
निवार्य्य मरणं पितुः समवधार्य्य दुःखातुर-
स्तपोवनगतोऽवसद्रघुपतिस्ततस्ताः समाः ॥ ३३ ॥
दशाननसहोदरां विषमबाणवेधातुरां
समीक्ष्य वररूपिणीं प्रहसतीं सतीं सुन्दरीम् ।

निजाश्रयमभीप्सतीं जनकजापतिर्लक्ष्मणात्
करालकरवालतः समकरोद्विरूपां ततः ॥ २४ ॥
समाप्य पथि दानवं खरशरैः शनैर्नाशयन्
चतुर्दशसहस्रकं समहनत् खरं सानुगम् ।
दशाननवशानुगं कनकचारुचञ्चन्मृगं
प्रियाप्रियकरो वने समवधीद् बलाद्राक्षसम् ॥ २५ ॥
ततो दशमुखस्त्वरंस्तमभिवीक्ष्य रामं रुषा
व्रजन्तमनुलक्ष्मणं जनकजां जहाराश्रमे ।
ततो रघुपतिः प्रियां दलकुटीरसंस्थापितां
न वीक्ष्य तु विमूर्च्छितो बहु विलप्य सीतेति ताम् ॥२६॥
वने निजगणाश्रमे नगतले जले पल्वले
विचित्य पतितं खगं पथि ददर्श सौमित्रिणा ।
जटायुवचनात् ततो दशमुखाहृतां जानकीं
विविच्य ज्ञतवान् मृते पितरि वह्निकृत्यं प्रभुः ॥ २७ ॥
प्रियाविरहकातरोऽनुजपुरःसरो राघवो
धनुर्धरधुरन्धरो हरिबलं नवालापिनम् ।
ददर्श ऋषभाचलाद्रविजबालिराजानुज-
प्रियं पवननन्दनं परिणतं हितं प्रेषितम् ॥ २८ ॥
ततस्तदुदितं मतं पवनपुत्रसुग्रीवयो-
स्तृणाधिपतिभेदनं निजनृपासनस्थापितम् ।
विविच्य व्यवसायकैर्निजसखाप्रियं बालिनं
निहत्य हरिभूपतिं निजसखं स रामोऽकरोत् ॥ २९ ॥
अथोत्तरमिमां हरिर्जनकजां समन्वेषयन्
जटायुसहजोदितैर्जलनिधिं तरन् वायुजः ।

दशाननपुरं विशन् जनकजां समानन्दयन्
अशोकवनिकाश्रमे रघुपतिं पुनः प्राययौ ॥ ४० ॥
ततो हनुमता बलादमितरक्षसां नाशनं
ज्वलज्ज्वलनसंकुलज्वलितदग्धलङ्कापुरम् ।
विविच्य रघुनायको जलनिधिं रुषा शोषयन्
बबन्ध हरियूथपैः परिवृतो नगैरीश्वरः ॥
बभञ्ज पुरपत्तनं विविधसर्गदुर्गाश्रमं
निशाचरपतेः क्रुधा रघुपतिः कृती सङ्गतिः ॥ ४१ ॥
ततोऽनुजयुतो युधि प्रबलचण्डकोदण्डभृत्
शरैः खरतरैः क्रुधा गजरथाश्वहंसाकुले ।
करालकरबालतः प्रबलकालजिह्वाग्रतो
निहत्य वरराक्षसान् नरपतिर्बभौ सानुगः ॥ ४२ ॥
ततोऽतिबलवानरैर्गिरिमहीरुहोद्यत्करैः
करालतरताड़नैर्जनकजा रुषा नाशितान् ।
निजघ्नुरमराईनानतिबलान् दशास्यानुगान्
नलाङ्गदहरीश्वराऽशुगसुतर्क्षराजादयः ॥ ४३ ॥
ततोऽतिबललक्ष्मणस्त्विदशनाथशत्रुं रणे
अघान घनघोषणानुगगणैरसृक्प्रासनैः ।
प्रहस्तविकटादिकानपि निशाचरान् सङ्गतान् ।
निकुम्भमकराक्षकान् निशितखड्गपातैः क्रुधा ॥ ४४ ॥
ततो दशमुखो रणे गजरथाश्वपत्तीश्वरै-
रलङ्घ्यगणकोटिभिः परिवृतो युयोधायुधैः ।
कपीश्वरचमूपतेः पतिमनन्तदिव्यायुधं
रघूद्वहमनिन्दितं सपदि सङ्गतो दुर्जयः ॥ ४५ ॥

दशाननमरिं ततो विधिवरास्त्रमायावर्धितं
महाबलपराक्रमं गिरिमिवाचलं संयुगे ।
अघान रघुनायको निशितशायकैरुद्यतं
निशाचरचमूपतिं प्रबलकुम्भकर्णं ततः ॥ ४६ ॥
तयोः खरतरैः शरैर्गगनमच्छमाच्छादितं
बभौ घनघटासमं मुखरमत्तषाड्वङ्घ्रिभिः ।
धनुर्गुणमहाग्निनिध्वनिभिरावृतं भूतलं
भयङ्करनिरन्तरं रघुपतेश्च रक्षःपतेः ॥ ४७ ॥
ततो धरणिजारुषा विविधरामबाणौजसा
पपात भुवि रावणस्त्रिदशनाथविद्रावणः ।
ततोऽतिकुतुकी हरिर्ज्वलनरक्षितां जानकीं
समर्प्य रघुपुङ्गवे निजपुरीं ययौ हर्षितः ॥ ४८ ॥
पुरन्दरकथादरः सपदि तत्र रक्षःपतिं
विभीषणमभीषणं समकरोत्ततो राघवः ॥ ४९ ॥
हरीश्वरगणावृतोऽवनिसुतायुतः सानुजो
रथे शिवसखेरिते सुविमले लसत्पुष्पके ।
मुनीश्वरगणार्चितो रघुपतिस्त्वयोध्यां ययौ
विविच्य मुनिलाञ्छनं गुहगुहेऽतिसख्यं स्मरन् ॥ ५० ॥
ततो निजगणावृतो भरतमातुरं सान्त्वयन्
स्वमात्यगणवाक्यतः पितृनिजासने भूपतिः ।
वशिष्ठमुनिपुङ्गवैः कृतनिजाभिषेको विभुः
समस्तजनपालकः सुरपतिर्यथा संबभौ ॥ ५१ ॥
नरा बहुधनाकरा द्विजवरास्तपस्तत्पराः
स्वधर्मकृतनिश्चया [illegible]भसङ्गता निर्भयाः ।

घनाः सुवर्षिणो वसुमती सदा हर्षिता
भवत्यतिबले नृपे रघुपतावभूत् सज्जगत् ॥ ५२ ॥
गतायुतसमाः प्रियैर्निजगुणैः प्रजा रञ्जयन्
निजां रघुपतिः प्रियां निजमनोभवैर्मोहयन् ।
मुनीन्द्रगणसंयुतोऽप्ययजदादिदेवाध्वरै-
र्धनैर्विपुलदक्षिणैरतुलवाजिमेधैस्त्रिभिः ॥ ५३ ॥
ततः किमपि कारणं मनसि भावयन् भूपति-
र्जहौ जनकजां वने रघुवरस्तदा निर्घृणः ।
ततो निजमतं स्मरन् समनयत् प्रचेतःसुतो
निजाश्रममुदारधीरघुपतेः प्रियां दुःखिताम् ॥ ५४ ॥
ततः कुशलवौ सुतौ प्रसुषुवे धरित्रीसुता
महाबलपराक्रमौ रघुपतेर्यशोगायनौ ।
स तामपि सुतान्वितां मुनिवरस्तु रामान्तिके
समर्पयदनिन्दितां सुरवरैः सदा वन्दिताम् ॥ ५५ ॥
ततो रघुपतिस्तु तां सुतयुतां रुदन्तीं पुरो
जगाद दहने पुनः प्रविश शोधनायात्मनः ।
इतीरितमवेक्ष्य सा रघुपतेः पदाब्जे नता
विवेश जननीयुता मणिगणोज्ज्वलं भूतलम् ॥ ५६ ॥
निरीक्ष्य रघुनायको जनकजाप्रयाणं स्मरन्
वशिष्ठगुरुयोगतोऽनुजयुतोऽगमत् स्वं पदम् ।
पुरःस्थितजनैः स्वकैः पशुभिरीश्वरः संस्पृशन्
मुदा सरयुजीवनं रथवरैः परीतो विभुः ॥ ५७ ॥
ये शृण्वन्ति रघूद्वहस्य चरितं कर्णामृतं सादरात्
संसारार्णवशोषणञ्च पठतामामोददं मोक्षदम् ।

रोगाणामिह शान्तये धनजनस्वर्गादिसम्पत्तये
वंशानामपि हृद्धये प्रभवति श्रीशः परेशः प्रभुः ॥ ५८ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे सूर्य्यवंशानुवर्णने श्रीरामचन्द्रचरितं नाम पञ्चमोऽध्यायः ।

चतुर्थोऽध्यायः ।

रामात् कुशोऽभूदतिथिस्ततोऽभून्निषधान्नभः ।
तस्मादभूत् पुण्डरीकः क्षेमधन्वाऽभवत् ततः ॥ १ ॥
देवानीकस्ततो हीनः पारिपात्रोऽथ हीनतः ।
बलाहकस्ततोऽर्कश्च रजनाभस्ततोऽभवत् ॥ २ ॥
खगणाद्विधृतस्तस्माद्धिरण्यनाभसंज्ञितः ।
ततः पुष्यात् ध्रुवस्तस्मात् स्यन्दनोऽथाग्निवर्णकः ॥ ३ ॥
तस्मात् शीघ्रोऽभवत् पुत्रः पिता मेऽतुलविक्रमः ।
तस्मान्मरुं मां केऽपीह बुधश्चापि सुमित्रकम् ॥ ४ ॥
कलापग्राममासाद्य विद्धि सत्तपसि स्थितम् ।
तवावतारं विज्ञाय व्यासात् सत्यवतीसुतात् ॥ ५ ॥
प्रतीच्य कालं लक्षाब्दं कलेः प्राप्तस्तवान्तिकम् ।
जन्मकोट्यङ्गसां राशेर्नाशनं धर्म्मशासनम् ।
यशःकीर्त्तिकरं सर्वकामपूरं परात्मनः ॥ ६ ॥

कल्किरुवाच । ज्ञातस्तवान्वयं त्वाञ्च सूर्य्यवंशसमुद्भवम् ।
द्वितीयः कोऽपरः श्रीमान् महापुरुषलक्षणः ॥ ७ ॥
इति कल्किवचः श्रुत्वा देवापिर्मधुराक्षराम् ।
वाणीं विनयसम्पन्नः प्रवक्तुमुपचक्रमे ॥ ८ ॥

देवापिरुवाच । प्रलयान्ते नाभिपद्मात् तवाभूच्चतुराननः ।

तदीयतनयादग्नेश्चम्द्रस्तस्मात्ततो बुधः ॥ ९ ॥
तस्मात् पुरूरवा जज्ञे ययातिर्नाहुषस्ततः ।
देवयान्यां ययातिस्तु यदुं तुर्वसुमेव च ॥ १० ॥
शर्मिष्ठायां तथा द्रुह्युञ्चानुं पुरुञ्च सत्पते ! ।
जनयामास भूतादिर्भूतानीव सिसृक्षया ॥ ११ ॥
पूरोर्जन्मेजयस्तस्मात् प्रचिन्वानभवत् ततः ।
प्रवीरस्तन्मनस्युर्वै तस्माच्चाभयदोऽभवत् ॥ १२ ॥
उरुक्षयाच्च चारुणिस्ततोऽभूत् पुष्करारुणिः ।
बृहत्क्षेत्रादभूद्धस्ती यन्नाम्ना हस्तिनापुरम् ॥ १३ ॥
अजमीढोऽहिमीढश्च पुरमीढस्तु तत्सुताः ।
अजमीढादभूद्बृहस्तस्मात् संवरणात् कुरुः ॥ १४ ॥
कुरोः परिक्षित् सुधनुर्जह्नुर्निषध एव च ।
सुहोत्रोऽभूत् सुधनुषश्चयवनाच्च ततः कृती ॥ १५ ॥
ततो बृहद्रथस्तस्मात् कुशाग्राद्वृषभोऽभवत् ।
ततः सत्यजितः पुत्रः पुष्पवान्नहुषस्ततः ॥ १६ ॥
बृहद्रथान्यभार्य्यायां जरासन्धः परन्तपः ।
सहदेवस्ततस्तस्मात् सोमापिर्यत् श्रुतश्रवाः ॥ १७ ॥
सुरथाद्विदूरथस्तस्मात् सार्वभौमोऽभवत् ततः ।
जयसेनाद्रथानीकोऽभूद् युतायुश्च कोपनः ॥ १८ ॥
तस्माद्देवातिथिस्तस्माद्बृहत्तस्माद्विलोपकः ।
तस्मात् प्रतीपकस्तस्य देवापिरहमीश्वर ! ॥१९॥
राज्यं शान्तनवे दत्त्वा तपस्येकधिया चिरम् ।
कलापग्राममासाद्य त्वां दिदृक्षुरिहागतः ॥ २० ॥
मरुणाऽमे न मुनिभिरेभिः प्राप्य पदाम्बुजम् ।

तव, कालकराख्याद् यास्यामात्मवतां पदम् ॥ २१ ॥
तयोरेवं वचः श्रुत्वा कल्किः कमललोचनः ।
प्रहस्य मरुदेवापी समाश्वास्य समब्रवीत् ॥ २२ ॥
कल्किरुवाच । युवां परमधर्मज्ञौ राजानौ विदितावुभौ ।
मदादेशकरौ भूत्वा निजराज्यं भरिष्यथः ॥ २३ ॥
मरो! त्वामभिषेक्ष्यामि निजायोध्यापुरेऽधुना ।
हत्वा म्लेच्छानधर्मिष्ठान् प्रजाभूतविहिंसकान् ॥ २४ ॥
देवापे ! तव राज्ये त्वां हस्तिनापुरपत्तने ।
अभिषेक्ष्यामि राजर्षे ! हत्वा पुक्कसकान् रणे ॥ २५ ॥
मथुरायामहं स्थित्वा हरिष्यामि तु वो भयम् ।
मय्याकर्णानुद्रमुखान् एकजङ्घान् विलोदरान् ॥ २६ ॥
हत्वा कृतं युगं कृत्वा पालयिष्याम्यहं प्रजाः ।
तपोवेशं व्रतं त्यक्त्वा समारुह्य रथोत्तमम् ॥ २७ ॥
युवां शस्त्रास्त्रकुशलौ सेनागणपरिच्छदौ ।
भूत्वा महारथौ लोके मया सह चरिष्यथः ॥ २८ ॥
विशाखयूपभूपालस्तनयां विनयान्विताम् ।
विवाहे रुचिरापाङ्गीं सुन्दरीं त्वां प्रदास्यति ॥ २९ ॥
सा वो भूपाल ! लोकानां स्वस्तये कुरु मे वचः ।
रुचिराश्वसुतां शान्तां देवापे ! त्वं समुद्वह ॥ ३० ॥
इत्याश्वासकथाः कल्केः श्रुत्वा तौ मुनिभिः सह ।
विस्मयाविष्टहृदयौ मेनाते हरिमीश्वरम् ॥ ३१ ॥
इति ब्रुवत्यभयदे ऽथाकाशात् सूर्य्यसन्निभौ ।
रथौ नानामणिव्रातघटितौ कामगौ पुरः ।
समायातौ ज्वलद्दिव्यशस्त्रास्त्रैः परिवारितौ ॥ ३२ ॥

दृष्ट्वस्ते सदोमध्ये विश्वकर्म्मविनिर्मितौ ।
भूपा मुनिगणाः सभ्याः सहर्षाः किमितीरिताः ॥२३॥
कल्किरुवाच । युवामादित्यसोमेन्द्रयमवैश्रवणाङ्गजौ ।
राजानौ लोकरक्षार्थमाविर्भूतौ विदन्त्यमी ॥ २४ ॥
कालेनाच्छादिताकारौ मम सङ्गादिहोदितौ ।
युवां रथावारुहतां शक्रदत्तं ममाज्ञया ॥ २५ ॥
एवं वदति विश्वेशे पद्मानाथे सनातने ।
देवा ववर्षुः कुसुमैस्तुष्टुवुर्मुनयोऽग्रतः ॥ २६ ॥
गङ्गावारिपरिक्लिन्नशिरोभूतिपरागवान् ।
शनैः पर्वतजासङ्गशिववत् पवनो ववौ ॥ २७ ॥
तत्रायातः प्रमुदिततनुस्तप्तचामीकराभो
धर्म्मावासः सुरुचिरजटाचीरभृद्दण्डहस्तः ।
लोकातीतो निजतनुमरुन्नाश्रिताऽधर्म्मसङ्घ-
स्तेजोराशिः सनकसदृशो मस्करी पुष्करार्च्यः ॥ २८ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे चन्द्रवंशानुकीर्त्तनं नाम चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

शुक उवाच । अथ कल्किः समालोक्य सदस्याम्यतिभिः सह
समुत्थाय ववन्दे तं पाद्यार्घ्याचमनादिभिः ॥ १ ॥
दृढं संवेश्य तं भिक्षुं सर्वाश्रमनमस्कृतम् ।
पप्रच्छ को भवानत्र ? मम भाग्यादिहागतः ॥ २ ॥
प्रायशो मानवा लोके लोकानां पारणेच्छया ।
चरन्ति सर्वसुहृदः पूर्णा विगतकल्मषाः ॥ ३ ॥

मरुत्त्यूवाच । अहं कृतयुगं श्रोत्र ! तवादेशकरं परम् ।
तवाविर्भावविभवमोक्षणार्थमिहागतम् ॥ ४ ॥
निरुपाधिर्भवान् कालः सोपाधित्वमुपागतः ।
क्षणदण्डत्ववाद्यैर्मायया रचितं स्वया ॥ ५ ॥
पक्षाहोरात्रमासर्त्तु संवत्सरयुगादयः ।
तवेक्षया चरन्त्येते मनवश्च चतुर्दश ॥ ६ ॥
स्वायम्भुवस्तु प्रथमस्ततः स्वारोचिषो मनुः ।
तृतीय उत्तमस्तस्माच्चतुर्थस्तामसः स्मृतः ॥ ७ ॥
पञ्चमो रैवतः षष्ठश्चाक्षुषः परिकीर्त्तितः ।
वैवस्वतः सप्तमो वै ततः सावर्णिरष्टमः ॥ ८ ॥
नवमो दक्षसावर्णिर्ब्रह्मसावर्णिकस्ततः ।
दशमो धर्म्मसावर्णिरेकादशः स उच्यते ॥ ९ ॥
रुद्रसावर्णिकस्तत्र मनुर्वै द्वादशः स्मृतः ।
त्रयोदशमनुर्वेदसावर्णिर्लोकविश्रुतः ॥ १० ॥
चतुर्दशेन्द्रसावर्णिरेते तव विभूतयः ।
यान्त्यायान्ति प्रकाशन्ते नामरूपादिभेदतः ॥ ११ ॥
द्वादशाब्दसहस्रेण देवानाञ्च चतुर्युगम् ।
चत्वारि त्रीणि द्वे चैकं सहस्रगणितं मतम् ॥ १२ ॥
तावत् शतानि चत्वारि त्रीणि द्वे चैकमेव हि ।
सन्ध्याक्रमेण तेषान्तु सन्ध्यांशोऽपि तथाविधः ॥ १२ ॥
एकसप्ततिकं तत्र युगं भुङ्क्ते मनुर्भुवि ।
मनूनामपि सर्वेषामेवं परिणतिर्भवेत् ।
दिवा प्रजापतेस्तत्तु निशा सा परिकीर्त्तिता ॥ १४ ॥
अहोरात्रञ्च पक्षस्ते माससंवत्सरर्त्तवः ।

सदुपाधिकृतः कालो ब्रह्मणो जन्ममृत्युकृत् ॥ १५ ॥
शतसंवत्सरे ब्रह्मा लयं प्राप्नोति हि त्वयि ।
लयान्ते त्वन्नाभिमध्यादुत्थितः सृजति प्रभुः ॥ १६ ॥
तत्र कृतयुगस्तेऽहं कालं सद्धर्मपालकम् ।
कृतकृत्याः प्रजा यत्र तन्नाम्ना मां कृतं विदुः ॥ १७ ॥
इति तद्वच आस्मृत्य कल्किर्निजजनावृतः ।
प्रहर्षमतुलं लब्ध्वा श्रुत्वा तद्वचनामृतम् ॥ १८ ॥
अवहित्यामुपालक्ष्य युगस्याद्य जनान् हितान् ।
योद्धुकामः कलेः पूर्यां हृष्टो विशसने प्रभुः ॥ १९ ॥

गजरथतुरगान्नरांश्च योधान्
कनकविचित्रविभूषणाचिताङ्गान् ।
धृतविविधवरास्त्रशस्त्रपूगान्
युधिनिपुणान् गणयध्वमानयध्वम् ॥ २० ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
कृतयुगागमनं नाम पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

सूत उवाच । इति तौ मरुदेवापी श्रुत्वा कल्केर्वचः पुरः ।
कृतोद्वाहौ रथारूढौ समायातौ महाभुजौ ॥ १ ॥
नानायुधधरैः सैन्यैरावृतौ शूरमानिनौ ।
बद्धगोधाङ्गुलित्राणौ दंशितौ बद्धहस्तकौ ॥ २ ॥
कार्ष्णायसशिरस्त्राणौ धनुर्द्धरधुरन्धरौ ।
अक्षौहिणीभिः षड्भिस्तु कम्पयन्तौ भुवं भरैः ॥ ३ ॥
विशाखयूपभूपस्तु गजलक्षैः समावृतः ।

अश्वैः सहस्रनियुतैः रथैः सप्तसहस्रकैः ॥ ४ ॥
पदातिभिर्हर्षलक्षैश्च सन्नद्धैर्धृतकार्मुकैः ।
वातोद्धतोत्तरोष्णीषैः सर्वतः परिवारितः ॥ ५ ॥
रुधिराश्वसहस्राणां पञ्चाशद्भिर्महारथैः ।
गजैर्दशशतैर्मत्तैर्नवलक्षैर्वृतो वभौ ॥ ६ ॥
अक्षौहिणीभिर्दशभिः कल्किः परपुरञ्जयः ।
समावृतस्तथा देवैरेवमिन्द्रो दिवि स्वराट् ॥ ७ ॥
भ्रातृपुत्रसुहृद्भिश्च मुदितः सैनिकैर्वृतः ।
ययौ दिग्विजयाकाङ्क्षी जगतामीश्वरः प्रभुः ॥ ८ ॥
काले तस्मिन् द्विजो भूत्वा धर्म्मः परिजनैः सह ।
समाजगाम कलिना बलिनापि निराकृतः ॥ ९ ॥
ऋतं प्रसादमभयं सुखं मुदमथ स्वयम् ।
योगमर्थं ततोऽदर्पं स्मृतिं क्षेमं प्रतिश्रयम् ॥ १० ॥
नरनारायणौ चोभौ हरेरंशौ तपोव्रतौ ।
धर्म्मस्त्वेतान् समादाय पुत्रान् स्त्रीश्चागतस्त्वरन् ॥ ११ ॥
श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः ।
बुद्धिर्मेधा तितिक्षा च ह्रीर्मूर्त्तिर्धर्म्मपालकाः ॥ १२ ॥
एतास्तेन सहायाता निजबन्धुगणैः सह ।
कल्किमालोकितं तत्र निजकार्य्यं निवेदितुम् ॥ १३ ॥
कल्किर्द्विजं समासाद्य पूजयित्वा यथाविधि ।
प्रोवाच विनयापन्नः कस्त्वं ? कस्मादिहागतः ? ॥१४॥
स्त्रीभिः पुत्रैश्च सहितः क्षीणपुण्य इव ग्रहः ।
कस्य वा ? विषयाद्राज्ञस्तत्तत्त्वं वद तत्वतः ॥ १५ ॥
पुत्राः स्त्रियश्च ते दीनाः हीनस्त्वबलपौरुषाः ।

वैष्णवाः साधवो यद्वत् पाषण्डैश्च तिरस्कृताः ॥ १६ ॥
कल्केरिति वचः श्रुत्वा धर्म्मः शर्म्म निजं स्मरन् ।
प्रोवाच कमलानाथमनाथस्त्वतिकातरः ॥ १७ ॥
पुत्रैः स्त्रीभिर्निजजनैः कृताञ्जलिपुटैर्हरिम् ।
स्तुत्वा नत्वा पूजयित्वा मुदितं तं दयापरम् ॥ १८ ॥
धर्म्म उवाच । शृणु कल्के ! ममाख्यानं धर्म्मोऽहं ब्रह्मरूपिणः।
तव वक्त्रःस्थलाज्जातः कामदः सर्वदेहिनाम् ॥ १९ ॥
देवानामग्रणीर्हव्यकव्यानां कामधुग् विभुः ।
तवाज्ञया चराम्येव साधुकीर्त्तिकृदन्वहम् ॥ २० ॥
सोऽहं कालेन बलिना कलिनापि निराकृतः ।
शककाम्बोजशवरैः सर्वैरावासवासिना ॥ २१ ॥
अधुना तेऽखिलाधार ! पादमूलमुपागताः ।
यथा संसारकालाग्निसन्तप्ताः साधवोऽर्दिताः ॥ २२ ॥
इति वाग्भिरपूर्वाभिर्धर्म्मेण परितोषितः ।
कल्किः कल्कहरः श्रीमानाह संहर्षयन् शनैः ॥ २३ ॥
धर्म्म ! कृतयुगं पश्य मरुं चण्डांशुवंशजम् ।
मां जानासि यथा जातं धात्रप्रार्थितविग्रहम् ॥ २४ ॥
कीटकैर्बौद्धदलनमिति मत्वा सुखी भव ।
अवैष्णवानामन्येषां तवोपद्रवकारिणाम् ।
जिवांसुर्यामि सेनाभिश्चर गां त्वं विनिर्भयः ॥ २५ ॥
का भीतिस्ते ? क्व मोहोऽस्ति ? यज्ञदानतपोव्रतैः ।
सहितैः सञ्चर विभो ! मयि सत्ये व्युपस्थिते ॥ १६ ॥
अहं यामि त्वयागच्छ स्वपुत्रैर्बान्धवैः सह ।
दिशां जयार्थं त्वं शत्रुनिग्रहार्थं जगत्प्रिय ! ॥ २७ ॥

इति कल्केर्वचः श्रुत्वा धर्मः परमहर्षितः ।
गन्तुं कृतमतिस्तेन आधिपत्यममुं स्मरन् ॥ २८ ॥
सिद्धाश्रमे निजजनानवस्थाप्य स्त्रियश्च ताः ॥ २८ ॥
सन्नद्धः साधुसत्कारैर्वेदब्रह्ममहारथः ।
नानाशास्त्रान्वेषणेषु सङ्कल्पवरकार्मुकः ॥ ३० ॥
सप्तस्वराश्वो भूदेवसारथिर्वक्रिराश्रयः ।
क्रियाभेदबलोपेतः प्रययौ धर्मनायकः ॥ ३१ ॥
यज्ञदानतपःपात्रैर्यमैश्च नियमैर्वृतः ।
खशकाम्बोजकान् सर्वान् शवरान् बर्बरानपि ॥ ३२ ॥
जेतुं कल्किर्ययौ यत्र कलेरावासमीप्सितम् ।
भूतवासबलोपेतं सारमेयवराकुलम् ॥ ३३ ॥
सोमांसपूतिगन्धाढ्यं काकोलूकशिवावृतम् ।
स्त्रीणां दुर्द्यूतकलहविवादव्यसनाश्रयम् ॥ ३४ ॥
घोरं जगद्भयकरं कामिनीस्वामिनं गृहम् ।
कलिः श्रुत्वोद्यमं कल्केः पुत्रपौत्रवृतः क्रुधा ॥ ३५ ॥
पुराद्विशसनान् प्रायात् पेचकाच्चरथोपरि ।
धर्मः कलिं समालोक्य ऋषिभिः परिवारितः ॥ ३६ ॥
युयुधे तेन सहसा कल्किवाक्यप्रचोदितः ।
ऋतेन दम्भः संग्रामे प्रसादो लोभमाद्रवयत् ॥ ३७ ॥
समयादभयं क्रोधो भयं सुखमुपाययौ ।
निरयो मुदमासाद्य युयुधे विविधायुधैः ॥ ३८ ॥
आधिर्योगेन च व्याधिः क्षेमेण च बलीयसा ।
प्रश्रयेण तथा ग्लानिर्जरास्मृतिमुपाद्रवयत् ॥ ३९ ॥
एवं वृत्तो महाघोरो युद्धः परमदारुणः ।

तं द्रष्टुमागता देवा ब्रह्माद्याः खे विभूतिभिः ॥ ४०
मरुः खशैश्च काम्बोजैर्युयुधे भीमविक्रमैः ।
देवापिः समरे चोनैर्वर्वरैस्तक्षणैरपि ॥ ४१ ॥
विशाखयूपभूपालः पुलिन्दैः खपचैः सह ।
युयुधे विविधैः शस्त्रैरस्त्रैर्दिव्यैर्महाप्रभैः ॥ ४२ ॥
कल्किः कोकविकोकाभ्यां वाहिनीभिर्वरायुधैः ।
तौ तु कोकविकौ च ब्रह्मणो वरदर्पितौ ॥ ४३ ॥
भ्रातरौ दानवश्रेष्ठौ मत्तौ युद्धविशारदौ ।
एकरूपौ महासत्त्वौ देवानां भयवर्धनौ ॥ ४४ ॥
पदातिकौ गदाहस्तौ वज्राङ्गौ जयिनौ दिशाम् ।
शुभैः परिवृतौ मृत्युजितावेकत्र योधनात् ॥ ४५ ॥
ताभ्यां स युयुधे कल्किः सेनागणसमन्वितः ।
शुभानां कल्किसैन्यानां समरस्तुमुलोऽभवत् ॥ ॥ ४६
क्ष्वेषितैर्ह्रेंहितैर्दन्तशब्दैष्टङ्कारनादितैः ।
शूरोत्क्रुष्टैर्बाहुवेगैः संशब्दैस्तलताड़नैः ॥ ४७ ॥
सम्पूरिता दिशः सर्वा लोका नो शर्म लेभिरे ।
देवाश्च भयसंत्रस्ता दिवि व्यस्तपथा ययुः ॥ ४८ ॥

पाशैर्दण्डैः खड्गशक्त्यृष्टिशूलै-
र्गदाघातैर्बाणपातैश्च घोरैः ।
युद्धे शूरास्छिन्नबाह्वङ्घ्रिमध्याः
पेतुः संख्ये शतशः कोटिशश्च ॥ ४९ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कल्किसेनासंग्रामो नाम षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

त उवाच । एवं प्रवृत्ते संग्रामे धर्म्मः परमकोपनः ।
कृतेन सहितो घोरं युयुधे कलिना सह ॥ १ ॥
कलिर्दमित्रबाणोघैर्धर्म्मस्यापि कृतस्य च ।
पराभूतः पुरीं प्रायात् त्यक्त्वा गर्दभवाहनम् ॥ २ ॥
विच्छिन्नपेचकरथः स्रवद्रक्ताङ्गसञ्चयः ।
कुकुर्गन्धः करालास्यः स्त्रीस्वामिकमगाद् गृहम् ॥ ३ ॥
दम्भः सम्भोगरहितोद्धृतबाणगणाहतः ।
व्याकुलः स्वकुलाङ्गारो निःसारः प्राविशद् गृहम् ॥ ४ ॥
लोभः प्रसादाभिहतो गदया भिन्नमस्तकः ।
सारमेयरथं छिन्नं त्यक्त्वागाद्रुधिरं वमन् ॥ ५ ॥
अभयेन जितः क्रोधः कषायीकृतलोचनः ।
गन्धाखुवाहं विच्छिन्नं त्यक्त्वा विशसनं गतः ॥ ६ ॥
भयं सुखतलाघाताद्गतासुर्न्यपतद् भुवि ।
निरयो मुदमुष्टिभ्यां पीड़ितो यममायया ॥ ७ ॥
आधिव्याध्यादयः सर्वे त्यक्त्वा वाहमुपाद्रुवन् ।
नानादेशान् भयोद्विग्ना कृतबाणप्रपीड़िताः ॥ ८ ॥
धर्म्मः कृतेन सहितो गत्वा विशसनं कलेः ।
नगरं बाणदहनैर्ददाह कलिना सह ॥ ९ ॥
कलिर्विभ्रष्टसर्वाङ्गो मृतदारो मृतप्रजः ।
जगामैको रुदन् दीनो वर्षान्तरमलक्षितः ॥ १० ॥
मरुत्तु शककाम्बोजान् जघ्ने दिव्यास्त्रतेजसा ।
देवापिः शवरांश्चोलान् बर्बरांस्तन्नृणानपि ॥ ११ ॥
दिव्यास्त्रशस्त्रसम्पातैरर्दयामास वीर्य्यवान् ।

विशाखयूपभूपालः पुलिन्दान् पुक्कसानपि ॥ १२ ॥
जघान विमलप्रज्ञः खड्गपातेन भूरिणा ।
नानास्त्रशस्त्रवर्षैस्ते योधा नेशुरनेकधा ॥ १३ ॥
कल्किः कोकविकोकाभ्यां गदापाणिर्युधां पतिः ।
युयुधे विन्यासविज्ञो लोकानां जनयन् भयम् ॥ १४ ॥
बकासुरस्य पुत्रौ तौ नप्तारौ शकुनेर्हरिः ।
तयोः कल्किः स युयुधे मधुकैटभयोर्यथा ॥ १५ ॥
तयोर्गदाप्रहारेण चूर्णिताङ्गस्य तत्पतेः ।
करात् च्युतापतद् भूमौ दृष्ट्वोचुरित्यहो जनाः ॥ १६ ।
ततः पुनः क्रुधा विष्णुर्जगज्जिष्णुर्महाभुजः ।
भल्लकेन शिरस्तस्य विकोकस्याच्छिनत् प्रभुः ॥ १७ ॥
मृतो विकोकः कोकस्य दर्शनादुत्थितो बली ।
तद् दृष्ट्वा विस्मिता देवाः कल्किश्च परवीरहा ॥ १८ ॥
प्रतिकर्त्तुर्गदापाणेः कोकस्याप्यच्छिनच्छिरः ।
मृतः कोको विकोकस्य दृष्टिपातात् समुत्थितः ॥ १९ ।
पुनस्तौ मिलितौ तेन युयुधाते महाबलौ ।
कामरूपधरौ वीरौ कालमृत्यू इवापरौ ॥ २० ॥
खड्गचर्मधरौ कल्किं प्रहरन्तौ पुनः पुनः ।
कल्किः क्रुधा तयोस्तद्वद् बाणेन शिरसी हृते ॥ २१ ॥
पुनर्लग्ने समालोक्य हरिश्चिन्तापरोऽभवत् ।
विमस्त्वत्वमथालोक्य तुरगस्तावताड़यत् ॥ २२ ॥
कालकल्पौ दुराधर्षौ तुरगेणार्दितौ भृशम् ।
कल्केस्तं जघ्नतुर्बाणैरमर्षाताम्रलोचनौ ॥ २३ ॥
तयोर्भुजान्तरं सोऽश्वः क्रुधा समदशद् भृशम् ।

तौ तु प्रभिन्नास्थिभुजौ विशस्ताङ्गदकार्मुकौ ।
पुच्छं जगृहतुः सप्तेर्गोपुच्छं बालकाविव ॥ २४ ॥
धृतपुच्छौ तु तौ ज्ञात्वा सप्तिः परमकोपनः ।
पश्चात् पद्भ्यां दृढं जघ्ने तयोर्वक्षसि वज्रवत् ॥ २५ ॥
त्यक्तपुच्छौ मूर्च्छितौ तौ तत्क्षणात् पुनरुत्थितौ ।
पुरतः कल्किमालोक्य बभाषाते स्फुटाक्षरौ ॥ २६ ॥
ततो ब्रह्मा समभ्येत्य कृताञ्जलिपुटः शनैः ।
प्रोवाच कल्किं नैवामू शस्त्रास्त्रैर्वधमर्हतः ॥ २७ ॥
कराघातादेककाले उभयोर्निर्मितो वधः ।
उभयोर्दर्शनादेव नोभयोर्मरणं क्वचित् ।
विदित्वेति कुरुष्वात्मन्! युगपच्चानयोर्वधम् ॥ २८ ॥
इति ब्रह्मवचः श्रुत्वा त्यक्तशस्त्रास्त्रवाहनः ।
तयोः प्रहरतोः स्वैरं कल्किर्दानवयोः क्रुधा ।
मुष्टिभ्यां वज्रकल्पाभ्यां बभञ्ज शिरसी तयोः ॥ २९ ॥
तौ तत्र भग्नमस्तिष्कौ भग्नशृङ्गावगाविव ।
पेततुर्दिवि देवानां भयदौ भुवि बाधकौ ॥ ३० ॥
दृष्ट्वा महदाश्चर्यं गन्धर्वाप्सरसां गणाः ।
नृतुर्जगुस्तुष्टुवुश्च मुनयः सिद्धचारणाः ।
देवाश्च कुसुमासारैर्ववर्षुर्हर्षमानसाः ॥ ३१ ॥
देवि दुन्दुभयो नेदुः प्रसन्नाश्चाभवन् दिशः ।
योर्वधप्रमुदितः कविर्दशसहस्रकान् ।
ाश्वान् महारथान् साक्षादहनद् दिव्यसायकैः ॥ ३२ ॥
ाग्रः शतसहस्राणां योधानां रणमूर्धनि ।
यं निन्ये सुमन्वस्तु रथिनां पञ्चविंशति ॥ ३३ ॥

एवमन्ये गार्ग्यभर्ग्यविशाखाद्या महारथान् ।
निजघ्नुः समरे क्रुद्धा निषादान् म्लेच्छपर्वरान् ॥ २४ ।
एवं विजित्य तान् सर्वान् कल्किर्भूपगणैः सह ।
शश्याकर्णश्च भल्लाटनगरं जेतुमाययौ ॥ २५ ॥
नानावाद्यैर्लोकसङ्घैर्वरास्त्रैः नानावस्त्रैर्भूषणैर्भूषिताङ्गैः ।
नानावाहैश्चामरैर्वीज्यमानैः यातो योद्धुं कल्किरत्युग्रसेनः॥२
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कोक-
विकोकादीनां बधो नाम सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

सूत उवाच । सेनागणैः परिवृतः कल्किर्नारायणः प्रभुः ।
भल्लाटनगरं प्रायात् खड्गधृक् सम्रिवाहनः ॥ १ ॥
स भल्लाटेश्वरो योगी ज्ञात्वा विष्णुं जगत्पतिम् ।
निजसेनागणैः पूर्णो योद्धुकामो हरिं ययौ ॥ २ ॥
स हर्षोत्पुलकः श्रीमान् ! दीर्घाङ्गः कृष्णभावनः ।
शशिध्वजो महातेजा गजायुतबलः सुधी ॥ ३ ॥
तस्य पत्नी महादेवी विष्णुव्रतपरायणा ।
सुशान्ता स्वामिनं प्राह कल्किना योद्धुमुद्यतम् ॥ ४ ॥
नाथ ! कान्तं जगन्नाथं सर्वान्तर्यामिनं प्रभुम् ।
कल्किं नारायणं साक्षात् कथं त्वं प्रहरिष्यसि ॥ ५ ।
शशिध्वज उवाच। सुशान्ते ! परमो धर्मः प्रजापतिविनिर्मि
युद्धे प्रहारः सर्वत्र गुरौ शिष्ये हरेरिव ॥ ६ ॥
जीवतो राजभोगः स्यात् मृतः स्वर्गे प्रमोदते ।
युद्धे जयो वा मृत्युर्वा क्षत्रियाणां सुखावहः ॥ ७ ॥

शान्तोवाच । देवत्वं भूपतित्वं वा विषयाविष्टकामिनाम् ।
उन्मदानां भवेदेव न हरेः पादसेविनाम् ॥ ८ ॥
त्वं सेवकः स चापीशस्त्वं निष्कामः स चाप्रदः ।
युवयोर्युद्धमिलनं कथं मोहाद् भविष्यति ॥ ९ ॥
शिध्वज उवाच । द्वन्द्वातीते यदि द्वन्द्वमीश्वरे सेवके तथा ।
देहावेशाल्लीलयैव सा सेवा स्यात्तथा मम ॥ १० ॥
देहावेशादीश्वरस्य कामाद्या दैहिका गुणाः ।
मायाज्ञा यदि जायन्ते विषयाश्च न किं तथा ॥ ११ ॥
ब्रह्मतो ब्रह्मतेशस्य शरीरित्वे शरीरिता ।
सेवकस्याभेदतश्चस्त्वेवं जन्मलयोदयाः ॥ १२ ॥
सेव्यसेवकता विष्णोर्माया सेवेति कीर्त्तिता ।
द्वैताद्वैतस्य चेष्टैषा त्रिवर्गजनिका सताम् ॥ १३ ॥
अतोऽहं कल्किना योद्धुं यामि कान्ते ! स्वसेनया ।
त्वं तं पूजय कान्तेऽद्य ! कमलापतिमीश्वरम् ॥ १४ ॥
कृतार्थोऽहं त्वया विष्णुसेवासम्मिलितात्मना ।
स्वामिन्निह परत्रापि वैष्णवी प्रथिता गतिः ॥१५॥
इति तस्या बलाद्वाग्भिः प्रणतायाः शशिध्वजः ।
आत्मानं वैष्णवं मेने साश्रुनेत्रो हरिं स्मरन् ॥ १६ ॥
तामालिङ्ग्य प्रमुदितः शूरैर्बहुभिरावृतः ।
वदन्नाम स्मरन् रूपं वैष्णवैर्योद्धुमाययौ ॥ १७ ॥
गत्वा तु कल्किसेनायां विद्राव्य महतीं चमूम् ।
शय्याकर्णगणैर्वीरैः सन्नद्धैरुद्यतायुधैः ॥ १८ ॥
शशिध्वजसुतः श्रीमान् ! सूर्य्यकेतुर्महाबलः ।
मरुभूपेन युयुधे वैष्णवो धन्विनां वरः ॥ १९ ॥

तस्यानुजो वृहत्केतुः कान्तः कोकिलनिस्वनः ।
देवापिना स युयुधे गदायुद्धविशारदः ॥ २० ॥
विशाखयूपभूपस्तु शशिध्वजनृपेण च ।
युयुधे विविधैः शस्त्रैः करिभिः परिवारितः ॥ २१ ॥
रुधिराख्यो धनुर्धारी लघुहस्तः प्रतापवान् ।
रजस्थानेन युयुधे भर्य्यः शान्तेन धन्विना ॥ २२ ॥
शूलैः प्रासैर्गदाघातैर्बाणशक्त्यृष्टितोमरैः ।
भल्लैः खड्गैर्भुषण्डीभिः कुन्तैः समभवद्रणः ॥ २३ ॥
पताकाभिर्ध्वजैश्चित्रैस्तोमरैश्चवचामरैः ।
प्रोद्भूतधूलिपटलैरन्धकारो महानभूत् ॥ २४ ॥
गगनेऽनुघना देवाः के वा वासं न चक्रिरे ।
गन्धर्वैः साधुसन्दर्भैर्गायनैरमृतायनैः ॥ २५ ॥
द्रष्टुं समागताः सर्वे लोकाः समरमद्भुतम् ।
शङ्खदुन्दुभिसन्नादैरास्फोटैर्हेंहितैरपि ॥ २६ ॥
क्ष्वेषितैर्योधनोत्क्रुष्टैर्लोका मूका इवाभवन् ।
रथिनो रथिभिः शाकं पदाताश्च पदातिभिः ॥ २७ ॥
हया हयैरिभाश्चेभैः समरोऽमरदानवैः ।
यथाभवत् स तु घनो यमराष्ट्रविवर्द्धनः ॥ २८ ॥
शशिध्वजचमूनाथैः कल्किसेनाधिपः सह ।
निपेतुः सैनिका भूमौ छिन्नबाहूरुकन्धराः ॥ २९ ॥
धावन्तोऽतिब्रुवन्तश्च विकुर्वन्तोऽसृगुक्षिताः ।
उपर्य्युपरि सञ्छन्ना गजाश्वरथमर्दिताः ॥ ३० ॥
निपेतुः प्रधने वीराः कोटिकोटिसहस्रशः ।
भूते सानन्दसन्दोहाः स्रवन्तो रुधिरोदकम् ॥ ३१ ॥

उष्णीषहंसाः सच्छिन्नगजरोधो रथप्लवाः ।
करोरुमीनाभरणमसिकाञ्चनवालुकाः ॥ ३२ ॥
एवं प्रवृत्ताः संग्रामे नद्यः सद्योऽतिदारुणाः ।
सूर्य्यकेतुस्तु मरुणा सहितो युयुधे बली ॥ ३३ ॥
कालकल्पो दुराधर्षो मरुं बाणैरताड़यत् ।
मरुस्तु तत्र दशभिर्मार्गणैरदरद् भृशम् ॥ ३४ ॥
मरुबाणाहतो वीरः सूर्य्यकेतुरमर्षितः ।
जघान तुरगान् कोपात् पदोद्घातेन तद्रथम् ॥ ३५ ॥
चूर्णयित्वाऽथ तेनापि तस्य वक्षस्यताड़यत् ।
गदाघातेन तेनापि मरुर्मूर्च्छामवाप ह ॥ ३६ ॥
सारथिस्तमपोवाहरथेनान्येन धर्म्मवित् ।
बृहत्केतुश्च देवापिं बाणैः प्राच्छादयद् बली ॥ ३७ ॥
धनुर्विकृष्य तरसा नीहारेण यथा रविम् ।
स तु बाणमयं वर्षं परिवार्य्य निजायुधैः ॥ ३८ ॥
बृहत्केतुं दृढं जघ्ने कङ्कपत्रैः शिलाशितैः ।
भिन्नं शूलमथालोक्य धनुर्गृह्य पतत्रिभिः ॥ ३९ ॥
शितधारैः स्वर्णपुङ्खैर्गाङ्गपत्रैरयोमुखैः ।
देवापिमाशुगैर्जघ्ने बृहत्केतुः ससैनिकम् ॥ ४० ॥
देवापिस्तद्धनुर्दिव्यं चिच्छेद निशितैः शरैः ।
छिन्नधन्वा बृहत्केतुः खड्गपाणिर्जिघांसया ॥ ४१ ॥
देवापेः सारथिं शाख्यं जघ्ने शूरो महामृधे ।
स देवापिर्धनुस्त्यक्त्वा तलेनाहत्य तं रिपुम् ॥ ४२ ॥
भुजयोरन्तरानीय निष्पिपेष स निर्दयः ।
तं हयाष्टवर्षं निष्क्रान्तं मूर्च्छितं शत्रुणार्दितम् ॥ ४३ ॥

अनुजं वीक्ष्य देवापि मूर्ध्नि सूर्य्यध्वजोऽबधीत् ।
मुष्टिना वज्रपातेन सोऽपतन्मूर्च्छितो भुवि ।
मूर्च्छितस्य रिपुः क्रोधात् सेनागणमताड़यत् ॥ ४४

शशिध्वजः सर्वजगन्निवासं
कल्किं पुरस्तादभिसूर्य्यवर्चसम् ।
श्यामं पिशङ्गाम्बरमम्बुजेक्षणं
वृहद्भुजं चारुकिरीटभूषिणम् ॥ ४५ ॥
नानामणिव्रातचिताङ्गशोभया
निरस्तलोकेक्षणहृत्तमोमयम् ।
विशाखयूपादिभिरावृतं प्रभुं
ददर्श धर्मेण कृतेन पूजितम् ॥ ४६ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे शशिध्वज कल्किसेनयोर्युद्धं नाम अष्टमोऽध्यायः ।

नवमोऽध्यायः ।

सूत उवाच । हृदि ध्यानास्पदं रूपं कल्केर्दृष्ट्वा शशिध्वजः ।
पूर्णं खड्गधरं चारुतुरगारूढ़मब्रवीत् ॥ १ ॥
धनुर्बाणधरं चारुविभूषणवराङ्गकम् ।
पापतापविनाशार्थमुद्यतं जगतां परम् ॥ २ ॥
प्राह तं परमात्मानं हृष्टरोमा शशिध्वजः ।
एह्येहि पुण्डरीकाक्ष ! प्रहारं कुरु मे हृदि ॥ ३ ॥
अथवात्मन् ! बाणभिया तमोऽन्धे हृदि मे विश ।
निर्गुणस्य गुणत्वमद्वैतस्यास्त्रताड़नम् ॥ ४ ॥

निष्कामस्य जयोद्योगसहायं यस्य सैनिकम् ।
लोकाः पश्यन्तु युद्धे मे हैरथे परमात्मनः ॥ ५ ॥
परबुद्धिर्यदि दृढं प्रहर्त्ता विभवे त्वयि ।
शिवविष्णोर्भेदकृते लोकं यास्यामि संयुगे ॥ ६ ॥
इति राज्ञो वचः श्रुत्वा अक्रोधः क्रुद्धवद्विभुः ।
बाणैरताड़यत् संख्ये धृतायुधमरिन्दमम् ॥ ७ ॥
शशिध्वजस्तत्प्रहारमगणय्य वरायुधैः ।
तं जघ्ने बाणवर्षेण धाराभिरिव पर्वतम् ॥ ८ ॥
तद् बाणवर्षभिन्नान्तः कल्किः परमकोपनः ।
दिव्यैः शस्त्रास्त्रसङ्घातैस्तयोर्युद्धमवर्त्तत ॥ ९ ॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रैर्वायव्यस्य च पर्वतैः ।
आग्नेयस्य च पार्ज्जन्यैः पन्नगस्य च गारुड़ैः ॥ १० ॥
एवं नानाविधैरस्त्रैरन्योऽन्यमभिजघ्नतुः ।
लोकाः सपालाः संत्रस्ता युगान्तमिव मेनिरे ॥ ११ ॥
देवा बाणाग्निसंत्रस्ता अगमन् खगमाः किल ।
ततोऽतिवितथोद्योगौ वासुदेवशशिध्वजौ ॥ १२ ॥
निरस्त्रौ बाहुयुद्धेन युयुधाते परस्परम् ।
पदाघातैस्तलाघातैर्मुष्टिप्रहरणैस्तथा ॥ १३ ॥
नियुद्धकुशलौ वीरौ मुमुदाते परस्परम् ।
वराहोद्धृतशब्देन तं तलेनाहनद्धरिः ॥ १४ ॥
स मूर्च्छितो नृपः कोपात् समुत्थाय च तत्क्षणात् ।
मुष्टिभ्यां वज्रकल्पाभ्यामबधीत् कल्किमोजसा ।
स कल्किस्तत्प्रहारेण पपात भुवि मूर्च्छितः ॥ १५ ॥
धर्म्मः क्षतञ्च तं दृष्ट्वा मूर्च्छितं जगदीश्वरम् ।

समागतौ तमानेतुं कक्षे तौ जगृहे नृपः ॥ १६ ॥
कल्किं वक्षस्युपादाय लब्धार्थः प्रययौ गृहम् ।
युद्धे नृपाणामन्येषां पुत्रौ दृष्ट्वा सुदुर्जयौ ॥ १७ ॥

कल्किं सुराधिपपतिं प्रधने विजित्य
धर्मं कृतञ्च निजकक्षयुगे निधाय ।
हर्षोल्लसद्धृदय उत्पुलकः प्रमाथी
गत्वा गृहं हरिगृहे ददृशे सुशान्ताम् ॥ १८ ॥

दृष्ट्वा तस्याः सुललितमुखं वैष्णवीनाञ्च मध्ये
गायन्तीनां हरिगुणकथास्तामथ प्राह राजा ।
देवादीनां विनयवचसा शम्भले जन्मवाना
विद्यालाभं परिणयविधिं म्लेच्छपाषण्डनाशम् ॥ १९ ॥

कल्किः स्वयं हृदि समायमिहागतोऽद्य
मूर्च्छाच्छलेन तव सेवनमोक्षणार्थम् ।
धर्मं कृतञ्च राम कक्षयुगे सुशान्ते !
कान्ते ! विलोकय समर्चय संविधेहि ॥ २० ॥

इति नृपवचसा विनोदपूर्णा
हरिकृतधर्मयुतं प्रणम्य नाथम् ।
सह निजसखिभिर्ननर्त्त रामा
हरिगुणकीर्त्तनवर्त्तना विलज्जा ॥ २१ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
धर्मकल्किकृतानामानयनं नाम नवमोऽध्यायः ।

दशमोऽध्यायः ।

सुशान्तोवाच ।

जय हरेऽमराधीशसेवितं तव पदाम्बुजं भूरिभूषणम् ।
कुरु ममाग्रतः साधुसत्कृतं त्यज महामते ! मोहमात्मनः ॥१॥
तव वपुर्जगद्रूपसम्पदा विरचितं सतां मानसे स्थितम् ।
रतिपतेर्मनोमोहदायकं कुरु विचेष्टितं कामलम्पटम् ॥ २ ॥
तव यशो जगच्छोकनाशनं मृदुकथामृतप्रीतिदायकम् ।
स्मितसुधोचितं चन्द्रवन्मुखं तव करोत्वलं लोकमङ्गलम् ॥३॥
मम पतिस्त्वयं सर्वदुर्जयो यदि तवाप्रियं कर्म्मणाचरेत् ।
ब्रूहि तदात्मनः शत्रुमुद्यतं कुरु कृपां न चेदीदृगीश्वरः ॥ ४ ॥
महदहं युतं पञ्चमात्रया प्रकृतिजायया निर्मितं वपुः ।
तव निरीक्षणाल्लीलया जगत् स्थितिलयोदयं ब्रह्मकल्पितम् ॥५
भूवियन्मरुद्वारितेजसां राशिभिः शरीरेन्द्रियाश्रितैः ।
त्रैगुण्यया स्वया मायया विभो ! कुरु कृपां भवत्सेवनार्थिनाम् ६
तव गुणालयं नाम पावनं कलिमलापहं कीर्त्तयन्ति ये ।
भवभयक्षयं, तापतापिता मुहुरहो जनाः संसरन्ति नो ॥७॥
तव जन्मः सतां मानवर्द्धनं निजकुलक्षयं देवपालकम् ।
कृतयुगार्पकं धर्म्मपूरकं कलिकुलान्तकं शन्तनोतु मे ॥ ८ ॥
मम गृहं पतिपुत्रनप्तृकं गजरथैर्ध्वजैश्चामरैर्धनैः ।
मणिवरासनं सत्कृतिं विना तव पदाब्जयोः शोभयन्ति किम् ?९
तव जगद्वपुः सुन्दरस्मितं मुखमनिन्दितं सुन्दरारवम् ।
यदि न मे प्रियं वल्गु चेष्टिते परिकरोत्यहो मृत्युरस्त्विह ॥१०॥

हयचरभयहरकरहरशरणखरतरवरशरदशबलमदन ! ।
जयहतपरभरभववरनशनशशधरशतसमरसभरवदन ! ॥११

इति तस्याः सुशान्ताया गीतेन परितोषितः ।
उत्तस्थौ रणशय्यायाः कल्किर्युद्धस्थवीरवत् ॥ १२ ॥
सुशान्तां पुरतो दृष्ट्वा कृतं वामे तु दक्षिणे ।
धर्मं शशिध्वजं पश्चात् प्राहेति व्रीड़िताननः ॥ १३ ॥
का त्वं ? पद्मपलाशाक्षि ! मम सेवार्थमुद्यता ।
कान्ते ! शशिध्वजः शूरो मम पश्चादुपस्थितः ॥ १४ ॥
हे धर्म ! हे कृतयुग ! कथमत्रागता ? वयम् ।
रणाङ्गनं विहायास्याः शत्रोरन्तःपुरे वद ॥ १५ ॥
शत्रुपक्षाः कथं साधु ! सेवन्ते मामरिं मुदा ।
शशिध्वजः शूरमानी मूर्च्छितं हन्ति नो कथम् ? ॥१६

सुशान्तोवाच । पाताले दिवि भूमौ वा नरनागसुराऽसुराः
नारायणस्य ते कल्के ! के वा ? सेवां न कुर्वते ॥ १७
यत् सेवकानां जगतां मित्राणां दर्शनादपि ।
निवर्त्तन्ते शत्रुभावस्तस्य साक्षात् कुतो रिपुः ? ॥ १८
त्वया सार्द्धं मम पतिः शत्रुभावेन संयुगे ।
यदि योग्यस्तदानेतुं किं समर्थो ? निजालयम् ॥१९॥
त्वव दासो मम स्वामी अहं दासी निजा तव ।
आवयोः सम्प्रसादाय आगतोऽसि महाभुज ! ॥ २० ॥

धर्म उवाच। अहं तवैतयोर्भक्त्या नामरूपानुकीर्त्तनात् ।
कृतार्थोऽस्मि कृतार्थोऽस्मि कृतार्थोऽस्मि कलिक्षय ! ॥२१

कृतयुग उवाच । अधुनाहं कृतयुगं तव दासस्य दर्शनात् ।
त्वमीश्वरो जगत्पूज्यसेवकस्यास्य तेजसा ॥ २२ ॥

शशिध्वज उवाच। दण्डं मां दण्डय विभो! योद्धुत्वादुद्यतायुधम्।
येन कामादिरागेण त्वय्यात्मन्यपि वैरिता ॥ २३ ॥
इति कल्किर्वचस्तेषां निशम्य हसितानन:।
त्वया जितोऽस्मीति नृपं पुन:पुनरुवाच ह ॥ २४ ॥
तत: शशिध्वजो राजा युद्धादाहूय पुत्रकान्।
सुशान्ताया मतिं बुद्ध्वा रमां प्रादात् स कल्कये ॥ २५ ॥
तदैत्य मरुदेवापी शशिध्वजसमाहृतौ।
विशाखयूपभूपश्च रुधिराश्वश्च संयुगात् ॥ २६ ॥
शय्याकर्णनृपेणापि भल्लाटं पुरमाययु:।
सेनागणैरसंख्यातै: सा पुरी महिताभवत् ॥ २७ ॥
गजाश्वरथसम्बाधै: पत्तिच्छत्ररथध्वजै:।
कल्किनापि रमायाश्च विवाहोत्सवसम्पदाम् ॥ २८ ॥
द्रष्टुं समीयुस्त्वरिता हर्षात् सबलवाहना:।
शङ्खभेरीमृदङ्गानां वादित्राणाञ्च निस्वनै: ॥ २९ ॥
नृत्यगीतविधानैश्च पुरस्त्रीकृतमङ्गलै:।
विवाहो रमया कल्केरभूदतिसुखावह: ॥ ३० ॥
नृपा नानाविधैर्भोज्यै: पूजिता विविशु: सभाम्।
ब्राह्मणा: क्षत्रिया वैश्या: शूद्राश्चावरजातय: ॥ ३१ ॥
विचित्रभोगाभरणा: कल्किं द्रष्टुमुपाविशन्।
तस्यां सभायां शुशुभे कल्कि: कमललोचन: ॥ ३२ ॥
नक्षत्रगणमध्यस्थ: पूर्ण: शशधरो यथा।
रेजे राजगणाधीशो लोकान् सर्वान् विमोहयन् ॥३३॥

रमापतिं कल्किमवेक्ष्य भूप:
सभागतं पद्मदलायतेक्षणम्।

जामातरं भक्तियुतेन कर्म्मणा
विबुध्य मध्ये निषसाद तत्र ह ॥ २४ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे कल्किना रमाविवाहो नाम दशमोऽध्यायः।

एकादशोऽध्यायः।

सूत उवाच। तत्राहुस्ते सभामध्ये वैष्णवं तं शशिध्वजम्।
मुनिभिः कथितानेकभक्तिव्यासक्तविग्रहम् ॥ १ ॥
सुशान्ताश्च कृतेनापि धर्मेण विधिवद् युताम्।
राजान ऊचुः। युवां नारायणास्यास्य कल्केः श्वशुरतां गतौ।
वयं नृपा इमे लोका ऋषयो ब्राह्मणाश्च ये ॥ २ ॥
प्रेक्ष्य भक्तिवितानं वा हरौ विस्मितमानसाः।
पृच्छामस्त्वामियं भक्तिः क्व लब्धा ? परमात्मनः ॥ ३ ॥
कस्य वा ? शिक्षिता राजन् ! किंवा ? नैसर्गिकी तव।
श्रोतुमिच्छामहे राजन् ! त्रिजगज्जनपावनीम्।
कथां भागवतीं त्वत्तः संसाराश्रमनाशिनीम् ॥ ४ ॥
शशिध्वज उवाच। स्त्रीपुंसोरावयोस्तत्तत् शृणुतामोघविक्रमाः!।
वृत्तं यज्जन्मकर्म्मादि स्मृतिं तद्भक्तिलक्षणम् ॥ ५ ॥
पुरा युगसहस्रान्ते गृध्रोऽहं पूतिमांसभुक्।
गृध्रीयं मे प्रियारण्ये कृतनीड़ो वनस्पतौ ॥ ६ ॥
चचार कामं सर्वत्र वनोपवनसङ्कुले।
मृतानां पूतिमांसौघैः प्राणिनां वृत्तिकल्पकौ ॥ ७ ॥
एकदा लुब्धकः क्रूरो लुलोभ पिशिताशिनौ।
आवां वीक्ष्य गृहे पुष्टं गृध्रं तत्राप्ययोजयत् ॥ ८ ॥

तं वीक्ष्य जातविश्रम्भौ क्षुधया परिपीड़ितौ ।
स्त्रीपुंसौ पतितौ तत्र मांसलोभितचेतसौ ॥ ९ ॥
बद्धावावां वीक्ष्य तदा हर्षादागत्य लुब्धकः ।
जग्राह कण्ठे तरसा चञ्चुग्राघातपीड़ितः ॥ १० ॥
आवां गृहीत्वा गण्डक्याः शिलायां सलिलान्तिके ।
मस्तिष्कं चूर्णयामास लुब्धकः पिशिताशनः ॥ ११ ॥
चक्राङ्कितशिलागङ्गामरणादपि तत्क्षणात् ।
ज्योतिर्मयविमानेन सद्यो भूत्वा चतुर्भुजौ ॥ १२ ॥
प्राप्तौ वैकुण्ठनिलयं सर्वलोकनमस्कृतम् ।
तत्र स्थित्वा युगशतं ब्रह्मणो लोकमागतौ ॥ १३ ॥
ब्रह्मलोके पञ्चशतं युगानामुपभुज्य वै ।
देवलोके कालवशाद् गतं युगचतुःशतम् ॥ १४ ॥
ततो भुवि नृपास्तावत् बद्धसूनुरहं स्मरन् ।
हरेरनुग्रहं लोके शालग्रामशिलाश्रमम् ॥ १५ ॥
जातिस्मरत्वं गण्डक्याः किं तस्याः कथयाम्यहम् ।
यज्जलस्पर्शमात्रेण माहात्म्यं मह्यदद्भुतम् ॥ १६ ॥
चक्राङ्कितशिलास्पर्शमरणस्येदृशं फलम् ।
न जाने वासुदेवस्य सेवया किं भविष्यति ॥ १७ ॥
इत्यावां हरिपूजासु हर्षविह्वलचेतसौ ।
नृत्यन्तावनुगायन्तौ विलुठन्तौ क्षितावि ह ॥ १८ ॥
कल्केर्नारायणांशस्य अवतारः कलिक्षयः ।
पुरा विदितवीर्यस्य पृष्टो ब्रह्ममुखात् श्रुतः ॥ १९ ॥
इति राजसभायां सः श्रावयित्वा निजाः कथाः ।
ददौ गजानामयुतमश्वानां लक्षमादरात् ॥ २० ॥

रथानां षट्सहस्रन्तु ददौ पूर्णस्य भक्तितः ।
दासीनां युवतीनाञ्च रमानाथाय षट्शतम् ॥ २१ ॥
रत्नानि च महार्घाणि दत्त्वा राजा शशिध्वजः ।
मेने कृतार्थमात्मानं स्वजनैर्बान्धवैः सह ॥ २२ ॥
सभासद इति श्रुत्वा पूर्वजन्मोदिताः कथाः ।
विस्मयाविष्टमनसः पूर्णं तं मेनिरे नृपम् ॥ २३ ॥
कल्किं स्तुवन्तो ध्यायन्तो प्रशंसन्तो जगज्जनाः ।
पुनस्तमाहुराजानं लक्षणं भक्तिभक्तयोः ॥ २४ ॥

नृपा ऊचुः । भक्तिकाम्याद् भगवतः को वा ? भक्तो विधानवि
किं करोति किमश्नाति क्व वा वसति वक्ति किम् ? ॥
एतान् वर्णय राजेन्द्र ! सर्वं त्वं वेत्सि सादरात् ।
जातिस्मरत्वात् कृष्णस्य जगतां पावनेच्छया ॥ २६ ॥

इति तेषां वचः श्रुत्वा प्रफुल्लवदनो नृपः ।
साधुवादैः समामन्त्र्य तानाह ब्रह्मणोदितम् ॥ २७ ॥

शशिध्वज उवाच । पुरा ब्रह्मसभामध्ये महर्षिगणसङ्कुले ।
सनको नारदं प्राह भवद्भिर्यास्त्विहोदिताः ॥ २८ ॥
तेषामनुग्रहेणाहं तत्रोषित्वा श्रुताः कथाः ।
यास्ताः संकथयामीह शृणुध्वं पापनाशनाः ॥ २९ ॥

सनक उवाच । का भक्तिः ? संसृतिहरा हरौ लोकनमस्कृत
तामादौ वर्णय मुने ! नारदावहिता वयम् ॥ ३० ॥

नारद उवाच । मनःषष्ठानीन्द्रियाणि संयम्य परया धिया
गुरावपि न्यसेद्देहं लोकतन्त्रविचक्षणः ॥ ३१ ॥
गुरौ प्रसन्ने भगवान् प्रसीदति हरिः स्वयम् ।
प्रणवाग्निप्रियामध्ये सवर्णं तन्निदेशतः ॥ ३२ ॥

स्मरेदनन्यया बुध्या देशिकः सुसमाहितः ।
पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥ ३३ ॥
पूजयित्वा वासुदेवपादपद्मं समाहितः ।
सर्वाङ्गसुन्दरं रम्यं स्मरेत् हृत्पद्ममध्यगम् ॥ ३४ ॥
एवं ध्यात्वा वाक्यमनोबुद्धीन्द्रियगणैः सह ।
आत्मानमर्पयेद् विद्वान् हरावेकान्तभाववित् ॥ ३५ ॥
अङ्गानि देवास्त्वेषान्तु नामानि विदितान्युत ।
विष्णोः कल्केरनन्तस्य तान्येवान्यत्र विद्यते ॥ ३६ ॥
सेव्यः कृष्णः सेवकोऽहमन्ये तस्यात्ममूर्त्तयः ।
अविद्योपाधयो ज्ञानाद् वदन्ति प्रभवादयः ॥ ३७ ॥
भक्तस्यापि हरौ हैतं सेव्यसेवकवत् तदा ।
नान्यद् विना तमित्येव क्व च ? किञ्च न विद्यते ॥३८॥
भक्तः स्मरति तं विष्णुं तन्नामानि च गायति ।
तत् कर्म्माणि करोत्येव तदानन्दसुखोदयः ॥ ३९ ॥
नृत्यत्युद्गतवद्रौति हसति प्रैति तन्मनाः ।
विलुठत्यात्मविस्मृत्या न वेत्ति कियदन्तरम् ॥ ४० ॥
एवंविधा भगवतो भक्तिरव्यभिचारिणी ।
पुनाति सहसा लोकान् सदेवासुरमानुषान् ॥ ४१ ॥
भक्तिः सा प्रकृतिर्नित्या ब्रह्मसम्पत् प्रकाशिता ।
शिवविष्णुब्रह्मरूपा वेदाद्यानां वरापि वा ॥ ४२ ॥
भक्ताः सत्वगुणाध्यासात् रजसेन्द्रियलालसाः ।
तमसा घोरसङ्कल्पा भजन्ति हैतदृग् जनाः ॥ ४३ ॥
सत्वान्निर्गुणतामेति रजसा विषयस्पृहा ।
तमसा नरकं यान्ति संसाराहैतधर्मिणि ॥ ४४ ॥

उच्छिष्टमवशिष्टं वा पथ्यं पूतमभीप्सितम् ।
भक्तानां भोजनं विष्णोर्नैवेद्यं सात्विकं मतम् ॥ ४५ ॥
इन्द्रियप्रीतिजननं शुक्रशोणितवर्द्धनम् ।
भोजनं राजसं शुद्धमायुरारोग्यवर्द्धनम् ॥ ४६ ॥
अतःपरं तामसानां कट्वम्लोष्णविदाहिकम् ।
पूतिपर्य्युषितं ज्ञेयं भोजनं तामसप्रियम् ॥ ४७ ॥
सात्विकानां वने वासो ग्रामे वासस्तु राजसः ।
तामसं द्यूतमद्यादिसदनं परिकीर्त्तितम् ॥ ४८ ॥
न दाता स हरिः किञ्चित् सेवकस्तु न याचकः ।
तथापि परमा प्रीतिस्तयोः किमिति शाश्वती ॥ ४९ ॥

इत्येतत् भगवत ईश्वरस्य विष्णो-
र्गुणकथनं सनको विबुध्य भक्त्या ।
सविनयवचनैः सुरर्षिवर्य्यं
परिणुत्येन्द्रपरं जगाम शुद्धः ॥ ५० ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
नृपगणशशिध्वजसंवादे जातिस्मरत्वकथनं
नाम एकादशोऽध्यायः ।

—०—

द्वादशोऽध्यायः ।

शशिध्वज उवाच ।

एतद् वः कथितं भूपाः ! कथनीयोरुकर्म्मणः ।
कथा भक्तस्य भक्तेश्च किमन्यत् कथयाम्यहम् ॥ १ ॥

भूपा ऊचुः । त्वं राजन् ! वैष्णवश्रेष्ठः सर्वसत्वहिते रतः ।
तवावेशः कथं युद्धरङ्गे हिंसादिकर्म्मणि ॥ २ ॥

प्रायशः साधवो लोके जीवानां हितकारिणः ।
प्राणबुद्धिधनैर्वाग्भिः सर्वेषां विषयात्मनाम् ॥ ३ ॥

शशिध्वज उवाच ।

द्वैतप्रकाशिनी या तु प्रकृतिः कामरूपिणी ।
सा सूते त्रिजगत् कृत्स्नं वेदांश्च त्रिगुणात्मिका ॥ ४ ॥
ते वेदास्त्रिजगत् धर्म्मशासना धर्म्मनाशनाः ।
भक्तिप्रवर्त्तका लोके कामिनां विषयैषिणाम् ॥ ५ ॥
वात्स्यायनादिमुनयो मनवो वेदपारगाः ।
वहन्ति बलिमीशस्य वेदवाक्यानुशासिताः ॥ ६ ॥
वयं तदनुगाः कर्म्मधर्म्मनिष्ठा रणप्रियाः ।
जिघांसन्तं जिघांसामो वेदार्थकृतनिश्चयाः ॥ ७ ॥
अबध्यस्य बधे यावांस्तावान् बध्यस्य रक्षणे ।
इत्याह भगवान् व्यासः सर्ववेदार्थतत्परः ॥ ८ ॥
प्रायश्चित्तं न तत्रास्ति तत्राधर्मः प्रवर्त्तते ।
अतोऽत्र वाहिनीं हत्वा भवतां युधि दुर्जयाम् ॥ ९ ॥
धर्म्मं कृतञ्च कल्किन्तु समानीयागता वयम् ।
एषा भक्तिर्मम मता तवाभिप्रेतमीरय ॥ १० ॥
अहं तदनुवक्ष्यामि वेदवाक्यानुसारतः ।
यदि विष्णुः स सर्वत्र तदा किं हन्ति को हतः ? ॥११॥
हन्ता विष्णुर्हतो विष्णुर्बधः कस्यास्ति तत्र चेत् ।
युद्धयज्ञादिषु बधे न बधो वेदशासनात् ॥ १२ ॥
इति गायन्ति मुनयो मनवश्च चतुर्दशम् ।
इत्थं युद्धैश्च यज्ञैश्च भजामो विष्णुमीश्वरम् ॥ १३ ॥
अतो भागवतीं मायामाश्रित्य विधिना यजन् ।

सेव्यसेवकभावेन सुखी भवति नान्यथा ॥ १४ ॥

भूपा ऊचुः । निमेर्भूपस्य भूपाल ! गुरोः शापात् मृतस्य च
तादृशे भोगायतने विरागः कथमुच्यताम् ॥ १५ ॥
शिष्यशापात् वशिष्ठस्य देहावाप्तिर्मृतस्य च ।
श्रूयते किल मुक्तानां जन्म भक्तविमुक्तता ॥ १६ ॥
अतो भागवती माया दुर्बोध्या विजितात्मनाम् ।
विमोहयन्ति संसारे नानात्वादिन्द्रजालवत् ॥ १७ ॥
इति तेषां वचो भूयः श्रुत्वा राजा शशिध्वजः ।
प्रोवाच वदतां श्रेष्ठो भक्तिप्रवणया धिया ॥ १८ ॥

शशिध्वज उवाच । बहुना जन्मनामन्ते तीर्थक्षेत्रादियोगतः ।
दैवाद् भवेत् साधुसङ्गस्तस्मादीश्वरदर्शनम् ॥ १९ ॥
ततः सालोक्यतामाप्य भजन्त्याहृतचेतसः ।
भुक्त्वा भोगाननुपमान् भक्तो भवति संसृतौ ॥ २० ॥
रजोजुषः कर्मपराः हरिपूजापराः सदा ।
तन्नामानि प्रगायन्ति तद्रूपस्मरणोत्सुकाः ॥ २१ ॥
अवतारानुकरणपर्ववतमहोत्सवाः ।
भगवद्भक्तिपूजाढ्याः परमानन्दसंप्लुताः ॥ २२ ॥
अतो मोक्षं न वाञ्छन्ति दृष्टमुक्तिफलोदयाः ।
मुक्त्वा लभन्ते जन्मानि हरिभावप्रकाशकाः ॥ २३ ॥
हरिरूपाः क्षेत्रतीर्थपावना धर्मतत्पराः ।
सारासारविदः सेव्यसेवका ह्येतविग्रहाः ॥ २४ ॥
यथावतारः कृष्णस्य तथा तत्सेविनामिह ।
एवं निमेर्निमिषता लीला भक्तस्य लोचने ॥ २५ ॥
मुक्तस्यापि वशिष्ठस्य शरीरभजनादरः ।

एतद्वः कथितं भूपा ! माहात्म्यं भक्तिभक्तयोः ॥ २६ ॥
सद्यःपापहरं पुंसां हरिभक्तिविवर्द्धनम् ।
सर्वेन्द्रियस्थदेवानामानन्दसुखसञ्चयम् ।
कामरागादिदोषघ्नं मायामोहनिवारणम् ॥ २७ ॥
नानाशास्त्रपुराणवेदविमलव्याख्यामृताम्भोनिधिं
संमथ्यातिचिरं त्रिलोकमुनयो व्यासादयो भावुकाः ।
कृष्णे भावमनन्यमेवममलं हैयङ्गवीनं नवं
लब्ध्वा संसृतिनाशनं त्रिभुवने श्रीकृष्णतुल्यायते ॥ २८ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
भक्तिभक्तमाहात्म्यं नाम द्वादशोऽध्यायः ॥

त्रयोदशोऽध्यायः ।

सूत उवाच । इति भूपः सभायां सः कथयित्वा निजाः कथाः ।
शशिध्वजः प्रीतमनाः प्राह कल्किं कृताञ्जलिः ॥ १ ॥

शशिध्वज उवाच ।

त्वं हि नाथ ! त्रिलोकेश ! एते भूपास्त्वदाश्रयाः ।
मां तथा विद्धि राजानं त्वन्निदेशकरं हरे ॥ २ ॥
तपस्तप्तुं यामि कामं हरिद्वारं मुनिप्रियम् ।
एते मत्पुत्रपौत्राश्च पालनीयास्त्वदाश्रयाः ॥ ३ ॥
ममापि कामं जानासि पुरा जाम्बवतो यथा ।
निधनं द्विविदस्यापि तदा सर्वं सुरेश्वर ! ॥ ४ ॥
इत्युक्त्वा गन्तुमुद्युक्तं भार्य्यया सहितं नृपम् ।
लज्जयाधोमुखं कल्किं प्राहुर्भूपाः किमित्युतः ॥ ५ ॥

हे नाथ ! किमनेनोक्तं यत् श्रुत्वा त्वमधोमुखः ।
कथं ? तद् ब्रूहि कामं नः किं वा नः शाधि संशयात् ॥ ६
कल्किरुवाच । अमुं पृच्छत वो भूपा यूयाकं संशयच्छिदम्
शशिध्वजं महाप्राज्ञं मज्ञक्तिकृतनिश्चयम् ॥ ७ ॥
इति कल्केर्वचः श्रुत्वा ते भूपाः प्रोक्तकारिणः ।
राजानं तं पुनः प्राहुः संशयापन्नमानसाः ॥ ८ ॥
नृपा ऊचुः । किं त्वया कथितं राजन् ! शशिध्वज ! महामते !
कथं कल्किस्तद्वदिदं श्रुत्वैवाभूदधोमुखः ॥ ९ ॥
शशिध्वज उवाच । पुरा रामावतारेण लक्ष्मणादिन्द्रजिद् बधम्
मोचयित्वालभ्य द्विविदो राक्षसत्वात् स दारुणात् ॥ १० ॥
अग्न्यागारे ब्रह्मवीरबधेनैकाह्निको ज्वरः ।
लक्ष्मणस्य शरीरेण प्रविष्टो मोहकारकः ॥ ११ ॥
तं व्याकुलमभिप्रेक्ष्य द्विविदो भिषजां वरः ।
अश्विवंशेन सञ्जातः स्वापयामास लक्ष्मणम् ॥ १२ ॥
लिखित्वा रामभद्रस्य संज्ञापत्रीमतन्द्रितः ।
लक्ष्मणं दर्शयामास ऊर्द्धस्तिष्ठन् महाभुजः ॥ १३ ॥
लक्ष्मणो वीक्ष्य तां पत्रीं विज्वरो बलवानभूत् ।
स ततो द्विविदं प्राह वरं वरय वानर ! ॥ १४ ॥
द्विविदस्तद्वचः श्रुत्वा लक्ष्मणं प्राह हृष्टवत् ।
त्वत्तो मे मरणं प्रार्थ्यं वानरत्वाच्च मोचनम् ॥ १५ ॥
पुनस्तं लक्ष्मणः प्राह मम जन्मान्तरे तव ।
मोचनं भविता कीश ! बलरामशरीरिणः ॥ १६ ॥
समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः ।
ऐकाह्निकं ज्वरं हन्ति लिखनं यस्तु पश्यति ॥ १७ ॥

इति मन्त्राक्षरं द्वारि लिखित्वा तालपत्रके ।
यस्तु पश्यति तस्यापि नश्यत्येकाहिकज्वरः ॥ १८ ॥
इति तस्य वरं लब्ध्वा चिरायुः सुखवानरः ।
बलरामास्त्रभिन्नात्मा मोक्षमापाकुतोभयम् ॥ १९ ॥
तथा क्षेत्रे सूतपुत्रो निहतो लोमहर्षणः ।
बलरामास्त्रयुक्तात्मा नैमिषेऽभूत् स्ववाञ्छया ॥ २० ॥
जाम्बुवांश्च पुरा भूपा वामनत्वं गते हरौ ।
तस्याप्यूर्ध्वगतं पादं तत्र चक्रे प्रदक्षिणम् ॥ २१ ॥
मनोजवं तं निरीक्ष्य वामनः प्राह विस्मितः ।
मत्तो वृणु वरं काममृक्षाधीश ! महाबल ! ॥ २२ ॥
इति तं हृष्टवदनो ब्रह्मांशो जाम्बुवान् मुदा ।
प्राह भो ! चक्रदहनात् मम मृत्युर्भविष्यति ॥ २३ ॥
इत्युक्तो वामनः प्राह क्षणजन्मनि मे तव ।
मोक्षश्चक्रेण संभिन्नशिरसः संभविष्यति ॥ २४ ॥
मम कृष्णावतारे तु सूर्य्यभक्तस्य भूपतेः ।
सत्राजितस्तु मण्यर्थे दुर्वादः समजायत ॥ २५ ॥
प्रसेनस्य तव भ्रातुर्बधस्तु मणिहेतुकः ।
सिंहात् तस्यापि मण्यर्थे बधो जाम्बवता कृतः ॥ २६ ॥
दुर्वादभयभीतस्य कृष्णस्यामिततेजसः ।
मण्यन्वेषणचित्तस्य ऋक्षेणाभूद्रणो विले ॥ २७ ॥
स निजेशं परिज्ञाय तच्चक्रग्रस्तबन्धनम् ।
मुक्तो बभूव सहसा कृष्णं पश्यन् सलक्ष्मणम् ॥ २८ ॥
नवदूर्वादलश्यामं दृष्ट्वा प्रादात् निजात्मजाम् ।
तदा जाम्बवतीं कन्यां प्रगृह्य मणिना सह ॥ २९ ॥

द्वारकां पुरमागत्य सभायां मामुपाह्वयत् ।
आह्वय मह्यं प्रददौ मणिं मुनिगणार्चितम् ॥ २० ॥
सोऽहं तां लज्जया तेन मणिना कन्यकां स्वकाम् ।
विवाहेन ददावस्मै लावण्याज्जगृहे मणिम् ॥ २१ ॥
तां सत्यभामामादाय मणिं मय्यर्प्य स प्रभुः ।
द्वारकामागत्य पुनर्गजाह्वयमगाद्विभुः ॥ २२ ॥
गते कृष्णे मां निहत्य शतधन्वाग्रहीन्मणिम् ।
अतोऽहमिह जानामि पूर्वजन्मनि यत् कृतम् ॥ २३ ॥
मिथ्याभिशापात् कृष्णस्य नैवाभून्मोचनं मम ।
अतोऽहं कल्किरूपाय कृष्णाय परमात्मने ।
दत्त्वा रमां सत्यभामारूपिणीं यामि सद्गतिम् ॥ २४ ॥
सुदर्शनास्त्रघातेन मरणं मम काङ्क्षितम् ।
मरणेऽभूदिति ज्ञात्वा रणे वाञ्छामि मोचनम् ॥ २५
इत्यसौ जगतामीशः कल्किः श्वशुरघातनम् ।
श्रुत्वैवाधोमुखस्तस्थौ ह्रिया धर्मभिया प्रभुः ॥ २६ ॥
अत्याश्चर्यमपूर्वमुत्तममिदं श्रुत्वा नृपा विस्मिता
लोकाः संसदि हर्षिता मुनिगणाः कल्केर्गुणाकर्षिता
आख्यानं परमादरेण सुखदं धन्यं यशस्यं परं
श्रीमद्रूपशशिध्वजेरितवचो मोक्षप्रदं चाभवत् ॥ ३७ ।

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे शशिध्वजेरितचक्रमरणाख्यानं नाम त्रयोदशोऽध्यायः ।

चतुर्दशोऽध्यायः ।

सूत उवाच । ततः कल्किर्महातेजाः श्वशुरं तं शशिध्वजम् ।
समामन्त्र्य वचश्चित्रैः सह भूपैर्ययौ हरिः ॥ १ ॥
शशिध्वजो वरं लब्ध्वा यथाकामं महेश्वरीम् ।
स्तुत्वा मायां त्यक्तमायः सप्रियः प्रययौ वनम् ॥ २ ॥
कल्किः सेनागणैः सार्द्धं प्रययौ काञ्चनीं पुरीम् ।
गिरिदुर्गावृतां गुप्तां भोगिभिर्विषवर्षिभिः ॥ ३ ॥
विदार्य्य दुर्गं सगणः कल्किः परपुरञ्जयः ।
छित्त्वा विषायुधान् बाणैस्तां पुरीं दृष्टवानच्युतः ॥ ४ ॥
मणिकाञ्चनचित्राढ्यां नागकन्यागणावृताम् ।
हरिचन्दनवृक्षाढ्यां मनुजैः परिवर्जिताम् ॥ ५ ॥
विलोक्य कल्किः प्रहसन् प्राह भूपान् किमित्यहो !।
सर्पस्येयं पुरी रम्या नराणां भयदायिनी ।
नागनारीगणाकीर्णा किं यास्यामो वदस्विह ॥ ६ ॥
इति कर्त्तव्यताव्यग्रं रमानाथं हरिं प्रभुम् ।
भूपांस्तदनुरूपाश्च खे वागाहाशरीरिणी ॥ ७ ॥
विलोक्य नेमां सेनाभिः प्रवेष्टुं भोक्ष्यमर्हसि ।
त्वां विनान्ये मरिष्यन्ति विषकन्यादृशादपि ॥ ८ ॥
आकाशवाणीमाकर्ण्य कल्किः शुकसहायवान् ।
ययावेकः खड्गधरस्तुरगेण त्वरान्वितः ॥ ९ ॥
गत्वा तां ददृशे वीरो धीराणां धैर्यनाशिनीम् ।
रूपेणाद्भुत लक्ष्मीशं प्राह प्रहसितानना ॥ १० ॥

विषकन्योवाच। संसारेऽस्मिन् मम नयनयोर्वीक्षणक्षीणदेहा
लोका भूपाः कति कति गता मृत्युमत्युग्रवीर्य्याः।
साहं दीनासुरसुरनरप्रेक्षणप्रेमहीना
ते नेत्राब्जद्वयरससुधाप्लाविता त्वां नमामि ॥ ११ ॥
क्वाहं विषेक्षणा दीना क्वामृतेक्षणसङ्गमः।
भवेऽस्मिन् भाग्यहीनायाः केनाहो! तपसा कृतः ॥१२॥
कल्किरुवाच। कासि कन्यासि सुश्रोणि! कस्मादेषा गतिस्तव
ब्रूहि मां कर्म्मणा केन विषनेत्रं तवाभवत् ॥ १३ ॥
विषकन्योवाच। चित्रग्रीवस्य भार्य्याहं गन्धर्वस्य महामते!
सुलोचनेति विख्याता पत्युरत्यन्तकामदा ॥ १४ ॥
एकदाहं विमानेन पत्या पीठेन सङ्गता।
मन्थमादनकुञ्जेषु रेमे कामकलाकुला ॥ १५ ॥
तत्र यच्चमुनिं दृष्ट्वा विकृताकारमातुरम्।
रूपयौवनगर्वेण कटाक्षेणाहसं मदात् ॥ १६ ॥
स्वोपालभं मुनिः श्रुत्वा वचनञ्च ममाप्रियम्।
अशाप मां क्रुधा तत्र तेनाहं विषदर्शना ॥ १७ ॥
निक्षिप्ताहं सर्पपुरे काञ्चन्यां नागिनीगणे।
पतिहीना दैवहीना चरामि विषवर्षिणी ॥ १८ ॥
न जाने केन तपसा भवद् दृष्टिपथं गता।
त्वत्प्रशापामृताच्चाहं पतिलोकं व्रजाम्यतः ॥ १९ ॥
अहो! तेषामस्तु शापः प्रसादो मा सतामिह।
पत्युः शापाद्दृषेर्मोक्षात् तव पादाब्जदर्शनम् ॥ २० ॥
इत्युक्त्वा सा ययौ स्वर्गं विमानेनार्कवर्चसा।
कल्किस्तु तत् पुराधीशं नृपं चक्रे महामतिम् ॥ २१ ॥

अमर्षस्तत्सुतो धीमान् सहस्रो नाम तत्सुतः ।
सहस्रतः सुतश्चासीद्राजा विश्रुतवाञ्शिः ॥ २२ ॥
बृहद्बलानां भूपानां सम्भूता यस्य वंशजाः ।
तं मनुं भूपशार्दूलं नानामुनिगणैर्वृतः ॥ २३ ॥
अयोध्यायां चाभिषिच्य मथुरामगमद्धरिः ।
तस्यां भूपं सूर्यकेतुमभिषिच्य महाप्रभम् ॥ २४ ॥
भूपं चक्रे ततो गत्वा देवापिं वारणावते ।
अरिस्थलं हृकस्थलं माकन्दञ्च गजाह्वयम् ॥ २५ ॥
पञ्चदेशेश्वरं कृत्वा हरिः शम्भलमाययौ ।
गौडं पौण्ड्रं पुलिन्दञ्च सुराष्ट्रं मगधं तथा ।
कविप्राज्ञसुमन्त्रेभ्यः प्रददौ भ्रातृवत्सलः ॥ २६ ॥
कीकटं मध्यकर्णाटमन्ध्रमोड्रं कलिङ्गकम् ।
अङ्गं वङ्गं स्वगोत्रेभ्यः प्रददौ जगदीश्वरः ॥ २७ ॥
स्वयं शम्भलमध्यस्थः कल्किकेन कलापकान् ।
देशं विशाखयूपाय प्रादात् कल्किः प्रतापवान् ॥ २८ ॥
चोलवर्वरकर्वाख्यान् द्वारकादेशमध्यगान् ।
पुत्रेभ्यः प्रददौ कल्किः शतवर्म्मपुरस्कृतान् ॥ २९ ॥
पित्रे धनानि रत्नानि ददौ परमभक्तितः ।
प्रजाः समाश्वास्य हरिः शम्भलग्रामवासिनः ॥ ३० ॥
पद्मया रमया कल्किर्गरुडस्थो मुमुदे भृशम् ।
धर्म्मश्चतुष्पादभवत् कृतपूर्णं जगत्त्रयम् ॥ ३१ ॥
देवा यथोक्तफलदास्चरन्ति भुवि सर्वतः ।
सर्वशस्या वसुमती पुष्टपुष्टजनाहता ।
गव्यवीर्य्यामृतैर्द्दीना व्याधिव्याधिविवर्जिता ॥ ३२ ॥

विप्रा वेदविदः सुमङ्गलयुता नार्य्यस्तु चार्य्या व्रतैः
पूजाहोमपराः पतिव्रतधरा यागोद्यताः क्षत्रियाः ।
वैश्या वस्तुषु धर्म्मतो विनिमयैः श्रीविष्णुपूजापराः
शूद्रास्तु द्विजसेवनाद्धरिकथालापाः सपर्य्यापराः ॥२२॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
विषकन्यामोक्षकृतधर्म्मप्रवृत्तिकथनं
नाम चतुर्दशोऽध्यायः ।

पञ्चदशोऽध्यायः ।

शौनक उवाच । शशिध्वजो महाराजः श्रुत्वा मायां मतः कुतः ।
का वा ? मायास्तुतिः सूत वद तत्त्वविदां वर ! ।
या त्वत्कथा विष्णुकथा वक्तव्या सा विशुद्धये ॥ १ ॥
सूत उवाच । शृणुध्वं मुनयः ! सर्वे ! मार्कण्डेयाय पृच्छते
शुकः प्राह विशुद्धात्मा मायास्तवमनुत्तमम् ॥ २ ॥
तत् शृणुष्व प्रवक्ष्यामि यथाधीतं यथाश्रुतम् ।
सर्वकामप्रदं नृणां पापतापविनाशनम् ॥ ३ ॥
शुक उवाच । भल्लाटनगरं त्यक्त्वा विष्णुभक्तः शशिध्वजः ।
आत्मसंसारमोक्षाय मायास्तवमलं जगौ ॥ ४ ॥

शशिध्वज उवाच ।

ओं ह्रींकारां सत्त्वसारां विशुद्धां ब्रह्मादीनां मातरं वेदबोध्याम्
तन्वीं स्वाहां भूततन्मात्रकक्षां वन्दे वन्द्यां देवगन्धर्वसिद्धैः ॥५
लोकातीतां द्वैतभूतां समीड्यां भूतैर्भव्यां व्याससामासिकाद्यैः ।
विद्वद्गीतां कालकल्लोललोलां लीलापाङ्गक्षिप्तसंसारदुर्गाम् ॥६

पूर्णां प्राप्यां हैतलभ्यां शरण्यामाद्ये शेषे मध्यतो या विभाति ।
नानारूपैर्देवतिर्यङ्मनुष्यैस्तामाधारां ब्रह्मरूपां नमामि ॥७॥
यस्या भासा त्रिजगद्भाति भूतैर्न भात्येतत्तदभावे विधातुः ।
कालो दैवं कर्म चोपाधयो ये तस्या भासा तां विशिष्टां नमामि॥८
भूमौ गन्धो रसताप्सु, प्रतिष्ठा रूपं तेजस्येव वायौ स्पृशत्वम् ।
खे शब्दो वा यच्चिदाभास्ति माना तामभ्येतां विश्वरूपां नमामि८
सावित्री त्वं ब्रह्मरूपा भवानी भूतेशस्य, श्रीपतेः श्रीस्वरूपा :
शची शक्रस्यापि नाकेश्वरस्य पत्नी श्रेष्ठा भासि माये ! जगत्सु॥१०
शास्त्रे बाला युवती यौवने त्वं वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्यागयोगैरुपास्या ज्ञानातीता कामरूपा विभासि११॥
अरण्या त्वं वरदा लोकसिद्धा साध्वी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या नानादेशे रूपवेशैर्विभासि१२

तव चरणसरोजं देवि ! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्त्या ।
श्रुतियुगकुहरे वा संश्रुतं धर्म्मसम्यत्
जनयति जगदाद्ये !'सर्वसिद्धिञ्च तेषाम् ॥ १३ ॥

मायास्तवमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादवाप्यापि सिद्धिं लोभी शशिध्वजः ॥ १४ ॥
कोकामुखे तपस्तप्त्वा हरिं ध्यात्वा वनान्तरे ।
सुदर्शनेन निहतो वैकुण्ठं शरणं ययौ ॥ १५ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
मायास्तवो नाम पञ्चदशोऽध्यायः ।

षोड़शोऽध्यायः ।

सूत उवाच । एतद् वः कथितं विप्राः ! शशिध्वजविमोक्षणम् ।
कल्केः कथामप्रतिमां शृण्वन्तु विबुधर्षभाः ! ॥ १ ॥
वेदो धर्मः कृतयुगं देवा लोकाश्चराचराः ।
हृष्टाः पुष्टाः सुसन्तुष्टाः कल्की राजनि चाभवन् ॥ २ ॥
नानादेवादिलिङ्गेषु भूषणैर्भूषितेषु च ।
इन्द्रजालिकवद् हस्तिकल्पकाः पूजका जनाः ॥ ३ ॥
न सन्ति मायामोहाख्याः पाषण्डाः साधुवञ्चकाः ।
तिलकार्चितसर्वाङ्गः कल्की राजनि लक्षितः ॥ ४ ॥
शम्भले वसतस्तस्य पद्मया रमया सह ।
प्राह विष्णुयशाः पुत्रं देवान् यष्टुं जगद्धितान् ॥ ५ ॥
तच्छ्रुत्वा प्राह पितरं कल्किः परमहर्षितः ।
विनयावनतो भूत्वः धर्मैकामार्थसिद्धये ॥ ६ ॥
राजसूयैर्वाजपेयैरश्वमेधैर्महामखैः ।
नानायागैः कर्मतन्त्रैरीजे क्रतुपतिं हरिम् ॥ ७ ॥
भृगुपरामवशिष्ठाद्यैर्व्यासधौम्याङ्गतत्रणैः ।
अश्वत्थाममधुच्छन्दो मन्दपालैर्महात्मनः ॥ ८ ॥
गङ्गायमुनयोर्मध्ये स्नात्वावभृथमादरात् ।
दक्षिणाभिः समभ्यर्च्य ब्राह्मणान् वेदपारगान् ॥ ९ ॥
चर्व्यैश्चोष्यैश्च पेयैश्च पूगशष्कुलियावकैः ।
मधुमांसैर्मूलफलैरन्नैश्च विविधैर्द्विजान् ॥ १० ॥
भोजयामास विधिवत् सर्वकर्मसमृद्धिभिः ।
यत्र वह्निर्हृतः पाके वरुणो जलदो मरुत् ॥ ११ ॥

परिवेष्टा द्विजान् कामैः सदन्नाद्यैरतोषयत् ।
वाद्यैर्नृत्यैश्च गीतैश्च पित्रयज्ञमहोत्सवैः ॥ १२ ॥
कल्किः कमलपत्राक्षः प्रहर्षः प्रददौ वसु ।
स्त्रीबालस्थविरादिभ्यः सर्वेभ्यश्च यथोचितम् ॥ १३ ॥
रम्भा तालधरानन्दी हुडुर्गायति नृत्यति ।
दत्त्वा दानानि पात्रेभ्यो ब्राह्मणेभ्यः स ईश्वरः ॥ १४ ॥
उवास तीरे गङ्गायाः पित्रवाक्यानुमोदितः ।
सभायां विष्णुयशसः पूर्वराजकथाः प्रियाः ॥ १५ ॥
कथयन्तो हसन्तश्च हर्षयन्तो द्विजा बुधाः ।
तत्रागतस्तुम्बुरुणा नारदः सुरपूजितः ॥ १६ ॥
तं पूजयामास मुदा पित्रा सह यथाविधि ।
तौ सम्पूज्य विष्णुयशाः प्रोवाच विनयान्वितः ।
नारदं वैष्णवं प्रीत्या वीणापाणिं महामुनिम् ॥ १७ ॥

विष्णुयशा उवाच ।

अहो ! भाग्यमहो ! भाग्यं मम जन्मशतार्जितम् ।
भवद्विधानां पूर्णानां यन्मे मोक्षाय दर्शनम् ॥ १८ ॥
अद्याग्नयश्च सुहुतास्तृप्ताश्च पितरः परम् ।
देवाश्च परिसन्तुष्टास्तवावेक्षणपूजनात् ॥ १९ ॥
यत्पूजायां भवेत् पूज्यो विष्णुर्यन्नमदर्शनम् ।
पापसङ्गं स्पर्शनाच्च किमहो ! साधुसङ्गमः ॥ २० ॥
साधूनां हृदयं धर्मो वाचो देवाः सनातनाः ।
कर्मक्षयाणि कर्माणि यतः साधुर्हरिः स्वयम् ॥ २१ ॥
मन्ये न भौतिको देहो वैष्णवस्य जगत्त्रये ।
यथावतारे कृष्णस्य सतो दुष्टविनिग्रहे ॥ २२ ॥

पृच्छामि त्वामतो ब्रह्मन् ! मायासंसारवारिधौ ।
नौकार्या विष्णुभक्त्या च कर्णधारोऽसि पारगत् ॥ २३
केनाहं यातनागारात् निर्वाणपदमुत्तमम् ।
लप्स्यामीह जगद्बन्धो ! कर्म्मणा ब्रूहि तद्वद ॥ २४ ॥

नारद उवाच । अहो ! बलवती माया सर्वाश्चर्य्यमयी शुभ
पितरं मातरं विष्णुर्नैव मुञ्चति कर्हिचित् ॥ २५ ॥
पूर्णो नारायणो यस्य सुतः कल्किर्जगत्पतिः ।
तं विहाय विष्णुयशा मत्तो मुक्तिमभीप्सति ॥ २६ ॥
विविक्षेत्थं ब्रह्मसुतः प्राह ब्रह्मयशःसुतम् ।
विविक्षे विष्णुयशसं ब्रह्मसम्पद्विवर्द्धनम् ॥ २७ ॥

नारद उवाच । देहावसाने जीवं सा दृष्ट्वा देहावलम्बनम्
मायाह कर्त्तुमिच्छन्तं यन्मे तत् शृणु मोक्षदम् ॥ २८
विन्ध्याद्रौ रमणी भूत्वा मायोवाच यथेच्छया ॥ २९ ॥

मायोवाच । अहं मा[illegible] मया त्यक्तः कथं जीवितुमिच्छसि

जीव उवाच । नाहं जीवाम्यहं माये ! कायेऽस्मिन् जीवनाय
अहमित्यन्यथाबुद्धिर्विना देहं कथं भवेत् ॥ ३० ॥

मायोवाच । देहबन्धे यथा श्लेषात् तथा बुद्धिः कथं तव ।
मायाधीनां विना चेष्टां विशिष्टां ते कुतो वद ॥ ३१

जीव उवाच । मां विना प्राप्नुता माये ! प्रकाशविषयस्पृहा

मायोवाच । मायया जीवति नरश्चेष्टते हतचेतनः ।
निःसारः सारवद् भाति गजभुक्तकपित्थवत् ॥ ३२ ॥

जीव उवाच । मम संसर्गजाता त्वं नानानामस्वरूपिणी ।
मां विनिन्दसि किं मूढे ! स्वैरिणी स्वामिनं यथा ॥ ३३
ममाभावे तवाभावः प्रोद्यत्सूर्य्ये तमो यथा ।

मामावर्य्य विभासि त्वं रविं नवघनो यथा ॥ ३५ ॥
लीलावीजकुशूलासि मम माये ! जगन्मये ! ।
नाद्यन्ते मध्यतो भासि मायात्वादिन्द्रजालवत् ॥ ३६ ॥
एवं निर्विषयं नित्यं मनोव्यापारवर्जितम् ।
अभौतिकमजीवञ्च शरीरं वीक्ष्य सात्यजत् ॥ ३७ ॥
त्यक्ता मां सा ददौ शापमिति लोके तवाप्रिय ! ।
न स्थितिर्भविता काष्ठकुड्योपम ! कथञ्चन ॥ ३८ ॥
सा माया तव पुत्रस्य कल्केर्विष्वात्मनः प्रभोः ।
तां विज्ञाय यथाकामं चर गां हरिभावनः ॥ ३९ ॥
निराशो निर्ममः शान्तः सर्वभोगेषु निष्पृहः ।
विष्णौ जगदिदं ज्ञात्वा विष्णुर्जगति वासवत् ।
आत्मनात्मानमावेश्य सर्वतो विरतो भव ॥ ४० ॥
एवं तं विष्णुयशसमामन्त्र्य च मुनीश्वरौ ।
कल्किं प्रदक्षिणीकृत्य जग्मतुः कपिलाश्रमम् ॥ ४१ ॥
नारदेरितमाकर्ण्य कल्किं सुतमनुत्तमम् ।
नारायणं जगन्नाथं वनं विष्णुयशा ययौ ॥ ४२ ॥
गत्वा वदरिकारण्यं तपस्तप्त्वा सुदारुणम् ।
जीवं ब्रह्मणि संयोज्य पूर्णस्तत्याज भौतिकम् ॥ ४३ ॥
मृतं स्वामिनमालिङ्ग्य सुमतिः स्नेहविक्लवा ।
विवेश दहनं साध्वी सुवेशैर्दिवि संस्तुता ॥ ४४ ॥
कल्किः श्रुत्वा मुनिमुखात् पित्रोर्निर्याणमीश्वरः ।
सवाष्पनयनं स्नेहात् तयोः समकरोत् क्रियाम् ॥ ४५ ॥
पद्मया रमया कल्किः शम्भले सुरवाञ्छिते ।
चकार राज्यं धर्म्मात्मा लोकवेदपुरस्कृतः ॥ ४६ ॥

महेन्द्रशिखराद्रामस्तीर्थपर्य्यटनादृतः ।
प्रायात् कल्केर्दर्शनार्थं शम्भलं तीर्थतीर्थवत् ॥ ४७ ॥
तं दृष्ट्वा सहोत्थाय पद्मया रमया सह ।
कल्किः प्रहर्षो विधिवत् पूजाञ्चक्रे विधानवित् ॥ ४८ ॥
नानारसैर्गुणमयैर्भोजयित्वा विचित्रिते ।
पर्य्यङ्केऽनर्घवस्त्राढ्ये शाययित्वा मुदं ययौ ॥ ४९ ॥
तं भुक्तवन्तं विश्रान्तं पादसंवाहनैर्गुरुम् ।
सन्तोष्य विनयापन्नः कल्किर्मधुरमब्रवीत् ॥ ५० ॥
तव प्रसादात् सिद्धं मे गुरो ! त्रैवर्गिकञ्च यत् ।
शशिध्वजसुतायास्तु शृणु राम ! निवेदितम् ॥ ५१ ॥

इति पतिवचनं निशम्य रामा
निजहृदयेप्सितपुत्रलाभमिष्टम् ।
व्रतजपनियमैर्यमैश्च कैर्वा
मम भवतीह मुदाह जामदग्न्यम् ॥ ५२ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे विष्णुयशसं मोक्षो रामदर्शनं नाम षोड़शोऽध्यायः ।

सप्तदशोऽध्यायः ।

सूत उवाच । जामदग्न्यः समाकर्ण्य रमां तां पुत्रगर्द्धिनीम्
कल्केरभिमतं बुद्ध्वाकारयद्रुक्मिणीव्रतम् ॥ १ ॥
व्रतेन तेन च रमा पुत्राढ्या सुभगा सती ।
सर्वभोगैश्च संयुक्ता बभूव स्थिरयौवना ॥ २ ॥

शौनक उवाच ।

विधानं ब्रूहि मे सूत ! व्रतस्यास्य च यत् फलम् ।
पुरा केन कृतं धर्म्यं रुक्मिणीव्रतमुत्तमम् ॥ २ ॥

सूत उवाच । शृणु ब्रह्मन् ! राजपुत्री शर्मिष्ठा वार्षपर्वणी ।
अवगाह्य सरोनीरं सोमं हरमपश्यत ॥ ४ ॥
सा सखीभिः परिवृता देवयान्या च सङ्गता ।
शम्भुभीत्या समुत्थाय पर्य्यधुर्वसनं शुतम् ॥ ५ ॥
तत्र शुक्रस्य कन्याया वस्त्रव्यत्ययमात्मनः ।
संलक्ष्य कुपिता प्राह वसनं त्यज भिक्षुकि ! ॥ ६ ॥
इति दानवकन्या सा दासीभिः परिवारिता ।
तां तस्या वाससा बद्ध्वा कूपे क्षिप्त्वा गता गृहम् ॥ ७ ॥
तां मग्नां रुदतीं कूपे अलार्थी नहुषात्मजः ।
करे स्पृश्य समुद्धृत्य प्राह का ? त्वं वरानने ! ॥ ८ ॥
सा शुक्रपुत्री वसनं परिधाय क्रिया भिया ।
शर्मिष्ठायाः कृतं सर्वं प्राह राजानमीक्षती ॥ ९ ॥
ययातिस्तदभिप्रायं ज्ञात्वानुव्रज्य शोभनम् ।
आश्वास्य तां ययौ गेहं तस्याः परिणयाहृतः ॥ १० ॥
सा गत्वा भवनं शुक्रं प्राह शर्मिष्ठया कृतम् ।
तच्छ्रुत्वा कुपितं विप्रं वृषपर्वाह सान्त्वयन् ॥ ११ ॥
दण्ड्यं मां दण्डय विभो ! कोपो यद्यस्ति ते मयि ।
शर्मिष्ठां वाप्यपङ्कतां कुरु यन्मनसेप्सितम् ॥ १२ ॥
राजानं प्रणतं पादे पितुर्दृष्ट्वा रुषाब्रवीत् ।
देवयानी स्त्रियं कन्या मम दासी भवत्विति ॥ १३ ॥
समानीय तदा राजा दास्ये तां विनियुज्य सः ।

ययौ निजगृहं ज्ञानी देवं परमकं स्मरन् ॥ १४ ॥
ततः शुक्रस्तमानीय ययातिं प्रतिलोमकम् ।
तस्मै ददौ तां विधिवत् देवयानीं तया सह ॥ १५ ॥
दत्त्वा प्राह नृपं विप्रोऽप्येनां राजसुतां यदि ।
शयने क्षयसे सद्यो जरा त्वामुपभोक्ष्यति ॥ १६ ॥
शुक्रस्यैतद्वचः श्रुत्वा राजा तां वरवर्णिनीम् ।
अदृश्यां स्थापयामास देवयान्यनुगां भिया ॥ १७ ॥
सा शर्मिष्ठा राजपुत्री दुःखशोकभयाकुला ।
नित्यं दासीशताकीर्णा देवयानीन्तु सेवते ॥ १८ ॥
एकदा सा वनगता रुदती जाह्नवीतटे ।
विश्वामित्रं मुनिं सा तं ददृशे स्त्रीभिरावृतम् ॥ १९ ॥
व्रतिनं पुण्यगन्धाभिः सुरूपाभिः सुवासितम् ।
कारयन्तं व्रतं माघ्यधूपदीपोपहारकैः ॥ २० ॥
निर्मायाष्टदलं पद्मं वेदिकायां सुचिह्नितम् ।
रम्भापोतैश्चतुर्भिस्तु चतुष्कोणं विराजितम् ॥ २१ ॥
वाससा निर्मितगृहे स्वर्णपट्टैर्विचित्रिते ।
निर्मितं श्रीवासुदेवं नानारत्नविघट्टितम् ॥ २२ ॥
पौरुषेण च सूक्तेन नानागन्धोदकैः शुभैः ।
पञ्चामृतैः पञ्चगव्यैर्यथामन्त्रैर्द्विजेरितैः ॥ २३ ॥
स्नापयित्वा भद्रपीठे कर्णिकायां प्रपूजयेत् ।
पञ्चभिर्दशभिर्वापि षोड़शैरुपचारकैः ॥ २४ ॥
पाद्यमर्घ्यञ्चमचरं शीतलं सुमनोहरम् ।
परमानन्दजनकं गृहाण परमेश्वर ! ॥ २५ ॥
दूर्वाचन्दनगन्धाढ्यमर्घ्यं युक्तं प्रयत्नतः ।

गृहाण रुक्मिणीनाथ ! प्रसन्नस्य मम प्रभो ! ॥ २६ ॥
नानातीर्थोद्भवं वारि सुगन्धि सुमनोहरम् ।
गृहाणाचमनीयं त्वं श्रीनिवास ! श्रिया सह ॥ २७ ॥
नानाकुसुमगन्धाढ्यं सूत्रग्रथितमुत्तमम् ।
वक्षःशोभाकरं चारु माल्यं नय सुरेश्वर ! ॥ २८ ॥
तन्तुसन्तानसन्धानरचितं बन्धनं हरे ! ।
गृहाणावरणं शुद्धं निरावरण ! सप्रिय ! ॥ २९ ॥
यज्ञसूत्रमिदं देव ! प्रजापतिविनिर्मितम् ।
गृहाण वासुदेव ! त्वं रुक्मिण्या रमया सह ॥ ३० ॥
नानारत्नसमायुक्तं स्वर्णसूत्राविघट्टितम् ।
प्रियया सह देवेश ! गृहाणाभरणं मम ॥ ३१ ॥
दधिक्षीरगुडाज्यादिपूपलड्डुकखण्डकान् ।
गृहाण रुक्मिणीनाथ ! सनाथं कुरु मां प्रभो ! ॥३२॥
कर्पूरागुरुगन्धाढ्यं परमानन्ददायकम् ।
धूपं गृहाण वरद ! वैदर्भ्या प्रियया सह ॥ ३३ ॥
भक्तानां गेहशक्तानां संसारध्वान्तनाशनम् ।
दीपमालोकय विभो ! जगदालोकनादर ! ॥ ३४ ॥
श्यामसुन्दर ! पद्माक्ष ! पीताम्बर ! चतुर्भुज ! ।
प्रपन्नं पाहि देवेश ! रुक्मिण्या सहिताच्युत ! ॥ ३५ ॥
इति तासां व्रतं दृष्ट्वा मुनिं नत्वा सुदुःखिता ।
शर्मिष्ठा मिष्टवचना कृताञ्जलिरुवाच ताः ॥ ३६ ॥
शर्मिष्ठोवाच । राजपुत्रीं दुर्भगां मां स्वामिना परिवर्जिताम् ।
क्षन्तुमर्हथ हे देव्यो ! व्रतेनानेन कर्मणा ॥ ३७ ॥
श्रुत्वा तु ता वचस्तस्याः कारुण्याच्च कियत् कियत् ।

पूजोपकरणं दत्त्वा कारयामासुरादरात् ॥ ३८ ॥
व्रतं कृत्वा तु शर्मिष्ठा लब्ध्वा स्वामिनमीश्वरम् ।
सूत्वा पुत्रान् सुसन्तुष्टा समभूत् स्थिरयौवना ॥ ३९ ॥
सीता चाशोकवनिकामध्ये सरमया सह ।
व्रतं कृत्वा पतिं लेभे रामं राक्षसनाशनम् ॥ ४० ॥
हरहरब्रह्मप्रसादेन कृत्वेमं द्रौपदी व्रतम् ।
पतियुक्ता दुःखमुक्ता बभूव स्थिरयौवना ॥ ४१ ॥
तथा रमा सिते पक्षे वैशाखे द्वादशी दिने ।
जामदग्न्याद् व्रतं चक्रे पूर्णं वर्षचतुष्टयम् ॥ ४२ ॥
पट्टसूत्रं करे बद्ध्वा भोजयित्वा द्विजान् बहून् ।
भुक्त्वा हविष्यं क्षीरान्नं सुहृष्टं स्वामिना सह ॥ ४३ ॥
बुभुजे पृथिवीं सर्वामपूर्वां स्वजनैर्हृता ।
सा पुत्रौ सुषुवे साध्वी मेघमालवलाहकौ ॥ ४४ ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतैः ।
महोत्साही महावीर्यौ सुभगौ कल्किसम्मतौ ॥ ४५ ॥

व्रतवरमिति कृत्वा सर्वसम्पत्समृद्धा
भवति विदिततत्त्वा पूजिता पूर्णकामा ।
हरिचरणसरोजद्वन्द्वभक्त्यैकतानो
व्रजति गतिमपूर्वां ब्रह्मविष्णुैरमम्याम् ॥ ४६ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे रुक्मिणीव्रतं नाम सप्तदशोऽध्यायः ।

अष्टादशोऽध्यायः ।

सूत उवाच । एतद् वः कथितं विप्रा! व्रतं त्रैलोक्यविश्रुतम् ।
अतःपरं कल्किकृतं कर्म्म यत् शृणुत द्विजाः ! ॥ १ ॥
शम्भले वसतस्तस्य सहस्रपरिवत्सराः ।
व्यतीता भ्रातृपुत्रस्वज्ञातिसम्बन्धिभिः सह ॥ २ ॥
शम्भले शुशुभे श्रेणी सभापण्यकचत्वरैः ।
पताकाध्वजचित्राढ्यैर्यथेन्द्रस्यामरावती ॥ ३ ॥
यत्राष्टषष्टितीर्थानां सम्भवः शम्भलेऽभवत् ।
मृत्योर्मोक्षः क्षितौ कल्केरकल्कस्य पदाश्रयात् ॥ ४ ॥
वनोपवनसन्तानानानाकुसुमसङ्कुलैः ।
शोभितं शम्भलं ग्रामं मन्ये मोक्षप्रदं भुवि ॥ ५ ॥
तत्र कल्किः पुरस्त्रीणां नयनानन्दवर्द्धनः ।
पद्मया रमया कामं रराम जगतीपतिः ॥ ६ ॥
सुराधिपप्रदत्तेन कामगेन रथेन वै ।
नदीपर्वतकुञ्जेषु द्वीपेषु परया मुदा ॥ ७ ॥
रममाणो विशन् पद्मारमाद्याभीरमापतिः ।
दिवानिशं न बुबुधे स्त्रैणश्च कामलम्पटः ॥ ८ ॥
पद्मामुखामोदसरोजसीधुवासोपभोगी सुविलासवासः ।
प्रभूतनीलेन्द्रमणिप्रकाशे गुहाविशेषे प्रविवेश कल्किः ॥ ९ ॥
पद्मा तु पद्माग्रतरूपरूपा रमा च पीयूषकलाविलासा ।
पतिं प्रविष्टं गिरिगह्वरे तं नारीसहस्राकुलितं त्वगाताम् ॥ १० ॥
पद्मा पतिं प्रेक्ष्य गुहानिविष्टं रन्तुं मनोज्ञा प्रविवेश पश्चात् ।
रमाबलायूथसमन्विता तत्पश्चाद्गता कल्किमहोग्रकामा ॥ ११ ॥

तत्रेन्द्रनीलोत्पलगन्धरान्ते कान्ताभिरात्मप्रतिमाभिरीशम् ।
कल्किञ्च दृष्ट्वा नवनीरदाभं ततः स्थितं प्रस्तरवन्मुमोह ॥१२॥
रमा सखीभिः प्रमदाभिरार्त्ता विलोकयन्ती दिशमाकुलाक्षी।
पद्मापि पद्माशतशोभमाना विषण्णचित्ता न बभौ स्म चार्त्ता ॥१३॥
भूमौ लिखन्ती निजकज्जलेन कल्किं शुकं तं कुचकुङ्कुमेन ।
कस्तूरिकाभिस्तु तदग्रभग्ने निर्माय चालिङ्ग्य ननाम भावात् १४
रमा कलालापपरा स्तुवन्ती कामार्दिता तं हृदये निधाय ।
ध्यात्वा निजालङ्करणैः प्रपूज्य तस्थौ विषण्णा करुणावसन्ना१५
क्षणात् समुत्थाय रुरोद रामा कलापिनः कण्ठनिभं स्वनाथम्।
हृदोपगूढं न पुनः प्रलभ्य कामार्दितेत्याह हरे प्रसीद ॥१६॥
पद्मापि निर्मुच्य निजाङ्गभूषाश्चकार धूलिपटले विलासम् ।
कण्ठञ्च कस्तूरिकयापि नीलं कामं निहन्तुं शिवतामुपेत्य ॥१७
कलावतीनां कलयाकलय्य क्षीणेक्षणानां हरिरात्तबन्धुः ।
कामप्रपूराय ससार मध्ये कल्किः प्रियाणां सुरतोत्सवाय ॥१८॥
ताः सादरेणात्मपतिं मनोज्ञाः करेणवो यूथपतिं यथेयुः ।
सानन्दभावा विषदानुहृष्टा वनेषु रामाः परिपूर्णकामाः ॥१९
वैभ्राजके चैत्ररथे सुपुष्पे सुनन्दने मन्दरकन्दरान्ते ।
रेमे स रामाभिरुदारतेजा रथेन भास्वत्खगमेन कल्किः ॥२०॥
पद्मामुखाब्जामृतपानमत्तो रमासमालिङ्गनवासरङ्गी ।
वराङ्गनानां कुचकुङ्कुमाक्तो रतिप्रसङ्गे विपरीतयुक्तः ।
मुखे विदष्टो रसनावशिष्टामोदः स कल्किर्न हि वेद देहम् २१
रमाः समानाः पुरुषोत्तमं तं वक्षोजमध्ये विनिधाय धीराः ।
परस्परश्लेषणजातहास्या रेमुर्मुकुन्दं विलसत् शरीराः ॥ २२ ॥

ततः सरोवरं त्वरा स्त्रियो ययुः क्लमज्वराः

प्रियेण तेन कल्किना वनान्तरे विहारिणा ।
सरः प्रविश्य पद्मया विमोहरूपया तया
जलं ददुर्वराङ्गनाः करेणवो यथा गजम् ॥ २३ ॥
इति ह युवतिलीला लोकनाथः स कल्किः
प्रिययुवतिपरीतः पद्मया रामयाद्यः ॥
निजरमणविनोदैः प्रीणयन् लोकवर्गान्
जयति विबुधभर्त्ता शम्भले वासुदेवः ॥ २४ ॥
ये शृण्वन्ति वदन्ति भावचतुरा ध्यायन्ति सन्तः सदा
कल्केः श्रीपुरुषोत्तमस्य चरितं कर्णामृतं सादराः ।
तेषां नो सुखयत्ययं मुररिपोर्दास्याभिलाषं विना
संसारः परिमोचनञ्च परमानन्दामृताम्भोनिधेः ॥ २५ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
कल्किवर्णनं नाम अष्टादशोऽध्यायः ।

ऊनविंशोऽध्यायः ।

त उवाच । ततो देवगणाः सर्वे ब्रह्मणा सहिता रथैः ।
स्वैः स्वैर्गणैः परिवृताः कल्किं द्रष्टुमुपाययुः ॥ १ ॥
महर्षयः सगन्धर्वाः किन्नराश्चाप्सरोगणाः ।
समाजग्मुः प्रमुदिताः शम्भलं सुरपूजितम् ॥ २ ॥
तत्र गत्वा सभामध्ये कल्किं कमललोचनम् ।
तेजोनिधिं प्रपन्नानां जनानामभयप्रदम् ॥ ३ ॥
नीलजीमूतसङ्काशं दीर्घपीवरबाहुकम् ।
किरीटेनार्कवर्णेन स्थिरविद्युन्निभेन तम् ॥ ४ ॥

शोभमानं द्युमणिना कुण्डलेनाभिशोभिना ।
सहर्षालापविकसद्वदनं स्मितशोभिनम् ॥ ५ ॥
कृपाकटाक्षविक्षेपपरिच्छिन्नविपक्षकम् ।
तारहारोल्लसद्वक्षश्चन्द्रकान्तमणिश्रिया ॥ ६ ॥
कुमुद्वतीमोदवहं स्फुरत्शक्रायुधाम्बरम् ।
सर्वदानन्दसन्दोहरसोल्लसितविग्रहम् ॥ ७ ॥
नानामणिगणोद्योतदीपितं रूपमद्भुतम् ।
ददृशुर्देवगन्धर्वा ये चान्ये समुपागता: ॥ ८ ॥
भक्त्या परमया युक्ता: परमानन्दविग्रहम् ।
कल्किं कमलपत्राक्षं तुष्टुवु: परमादरात् ॥ ९ ॥

देवा ऊचु: । जयाशेषसंक्लेशकक्षप्रकीर्णानलोद्दामसङ्कीर्ण ! ईश
देवेश ! विश्वेश ! भूतेश ! भाव: ।
तवानन्त चान्त:स्थितोऽङ्गारतत्व-
प्रभाभातएतदाजितानन्तशक्ते ! ॥ १० ॥
प्रकाशीकृताशेषलोकत्रयात्र
वक्ष:स्थले भास्वत्कौस्तुभश्याम ! ।
मेघौघराजत्शरीरद्विजाधीशपुच्छानन !
त्राहि विष्णो ! सदारा: वयं त्वां प्रपन्ना सशेषा: ॥११॥
यद्यस्त्यनुग्रहोऽस्माकं व्रज वैकुण्ठमीश्वर ! ।
त्यक्त्वा शासितभूतखण्डं सत्यधर्म्माविरोधत: ॥ १२ ॥
कल्किस्तेषामिति वच: श्रुत्वा परमहर्षित: ।
पात्रमित्रै: परिवृतश्चकार गमने मतिम् ॥ १३ ॥
पुत्रानाहूय चतुरो महाबलपराक्रमान् ।
राज्ये निक्षिप्य सहसा धर्मिष्ठान् प्रकृतिप्रियान् ॥ १४ ॥

ततः प्रजाः समाहूय कथयित्वा निजाः कथाः ।
प्राह तान् निजनिर्याणं देवानामुपरोधतः ॥ १५ ॥
तच्छ्रुत्वा ताः प्रजाः सर्वा रुरुदुर्विस्मयान्विताः ।
तं प्राहुः प्रणताः पुत्रा तथा पितरमीश्वरम् ॥ १६ ॥
प्रजा ऊचुः। भो नाथ ! सर्वधर्मज्ञ ! नास्मान् त्यक्तुमिहार्हसि ।
यत्र त्वं तत्र तु वयं यामः प्रणतवत्सल ! ॥ १७ ॥
प्रिया गृहा धनान्यत्र पुत्राः प्राणास्त्वानुगाः ।
परत्रेह विशोकाय ज्ञात्वा त्वां यज्ञपूरुषम् ॥ १८ ॥
इति तद्वचनं श्रुत्वा सान्त्वयित्वा सदुक्तिभिः ।
प्रययौ क्लिन्नहृदयः पद्मीभ्यां सहितो वनम् ॥ १९ ॥
हिमालयं मुनिगणैराकीर्णं जाह्नवीजलैः ।
परिपूर्णं देवगणैः सेवितं मनसः प्रियम् ॥ २० ॥
गत्वा विष्णुः सुरगणैर्हृतश्चारुचतुर्भुजः ।
उषित्वा जाह्नवीतीरे सस्मारात्मानमात्मना ॥ २१ ॥
पूर्णज्योतिर्मयः साक्षी परमात्मा पुरातनः ।
बभौ सूर्यसहस्राणां तेजोराशिसमद्युतिः ॥ २२ ॥
शङ्खचक्रगदापद्मशार्ङ्गाद्यैः समभिष्टुतः ।
नानालङ्करणानाञ्च समलङ्करणाकृतिः ॥ २३ ॥
वव्रुषुस्तं सुराः पुष्पैः कौस्तुभामुक्तकन्धरम् ।
सुगन्धिकुसुमासारैर्देवदुन्दुभिनिस्वनैः ॥ २४ ॥
तुष्टुवुर्मुमुहुः सर्वे लोकाः सस्थाणुजङ्गमाः ।
दृष्ट्वा रूपमरूपस्य निर्याणे वैष्णवं पदम् ॥ २५ ॥
तद्दृष्ट्वा महदाश्चर्यं पत्युः कक्ष्मेर्महात्मनः ।
रमा पद्मा च दहनं प्रविश्य तमवापतुः ॥ २६ ॥

धर्म्मः कृतयुगं कल्केराज्ञया पृथिवीतले ।
निःसपत्नौ सुसुखिनौ भूलोकं चेरतुश्चिरम् ॥ २७ ॥
देवापिश्च मरुः कामं कल्केरादेशकारिणौ ।
प्रजाः सम्पालयन्तौ तु भुवं जुगुपतुः प्रभू ॥ २८ ॥
विशाखयूपभूपालः कल्केर्निर्याणमीदृशम् ।
श्रुत्वा स्वपुत्रं विषये नृपं कृत्वा गतो वनम् ॥ २९ ॥
अन्ये नृपतयो ये च कल्केर्विरहकर्षिताः ।
तं ध्यायन्तो जपन्तश्च विरक्ताः स्युर्नृपासने ॥ ३० ॥
इति कल्केरनन्तस्य कथां भुवनपावनीम् ।
कथयित्वा शुकः प्रायात् नरनारायणाश्रमम् ॥ ३१ ॥
मार्कण्डेयादयो ये च मुनयः प्रशमायनाः ।
श्रुत्वानुभावं कल्केस्ते तं ध्यायन्तो जगुर्यशः ॥ ३२ ॥
यस्यानुशासनात् भूमौ नाधर्मिष्ठाः प्रजा जनाः ।
नाल्पायुषो दरिद्राश्च न पाषण्डा न हैतुकाः ॥ ३३ ॥
नाधयो व्याधयः क्लेशा दैवभूतात्मसम्भवाः ।
निर्मत्सराः सदानन्दा बभूवुर्जीवजातयः ॥ ३४ ॥
इत्येतत् कथितं कल्केरवतारं महोदयम् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं परम् ॥ ३५ ॥
शोकसन्तापपापघ्नं कलिव्याकुलनाशनम् ।
सुखदं मोक्षदं लोके वाञ्छितार्थफलप्रदम् ॥ ३६ ॥
तावत् शास्त्रप्रदीपानां प्रकाशो भुवि रोचते ।
भक्तिभानुपुराणाख्या यावत् लोकेऽतिकामधुक् ॥ ३७ ।
श्रुत्वैतत् भृगुवंशजो मुनिगणैः साकं सहर्षो वशी
ज्ञात्वा सूतममेयबोधविदितं श्रीलोमहर्षात्मजम् ।

श्रीकल्कीरवतारवाक्यममलं भक्तिप्रदं श्रीहरेः
सुश्रूषुः पुनराह साधुवचसा गङ्गास्तवं सत्कृतः ॥ ३८ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
कल्किनिर्याणं नाम ऊनविंशोऽध्यायः ।

विंशोऽध्यायः ।

शौनक उवाच । हे सूत ! सर्वधर्मज्ञ ! यत्त्वया कथितं पुरा ।
गङ्गां स्तुत्वा समायाता मुनयः कल्किसन्निधिम् ॥ १ ॥
स्तवं तं वद गङ्गायाः सर्वपापप्रणाशनम् ।
मोक्षदं शुभदं भक्त्या शृण्वतां पठतामिह ॥ २ ॥

सूत उवाच । शृणुध्वमृषयः ! सर्वे ! गङ्गास्तवमनुत्तमम् ।
शोकमोहहरं पुंसां ऋषिभिः परिकीर्त्तितम् ॥ ३ ॥

ऋषय ऊचुः । इयं सुरतरङ्गिणी भुवनवारिधेस्तारिणी
सुता हरिपदाम्बुजादुपगता जगत्संसदः ।
सुमेरुशिखरामरप्रियजला मलक्षालनी
प्रसन्नवदना शुभा भवभयस्य विद्रावणी ॥ ४ ॥
भगीरथमथानुगा सुरकरीन्द्रदर्पापहा
महेशमुकुटप्रभा गिरिशिरःपताका सिता ।
सुरासुरनरोरगैरजभवाच्युतैः संस्तुता
विमुक्तिफलशालिनी कलुषनाशिनी राजते ॥ ५ ॥
पितामहकमण्डलुप्रभवमुक्तिवीजा लता
श्रुतिस्मृतिगणस्तुतद्विजकुलालबालावृता ।
सुमेरुशिखराभिदा निपतिता त्रिलोकावृता
सुधर्मफलशालिनी सुखपलाशिनी राजते ॥ ६ ॥

चरद्विहगमालिनी सगरवंशमुक्तिप्रदा
मुनीन्द्रवरनन्दिनी दिवि मता च मन्दाकिनी ।
सदा दुरितनाशिनी विमलवारिसन्दर्शन-
प्रणामगुणकीर्त्तनादिषु जगत्सु संराजते ॥ ७ ॥
महाभिधसुताङ्गना हिमगिरीशकूटस्तना
सफेनजलहासिनी सितमरालसञ्चारिणी ।
चलल्लहरसत्करा वरसरोजमालाधरा
रसोल्लसितगामिनी जलधिकामिनी राजते ॥ ८ ॥
क्वचिन्मुनिगणैः स्तुता क्वचिदनन्तसम्पूजिता
क्वचित् कलकलस्वना क्वचिदधीरयादोगणा ।
क्वचिद्रविकरोज्ज्वला क्वचिदुदग्रपाताकुला
क्वचिज्जनविगाहिता जयति भीष्ममाता सती ॥ ९ ॥
स एव कुशली जनः प्रणमतीह भागीरथीं
स एव तपसां निधिर्जपति जाह्नवीमादरात् ।
स एव पुरुषोत्तमः स्मरति साधु मन्दाकिनीं
स एव विजयी प्रभुः सुरतरङ्गिणीं सेवते ॥ १० ॥
तवामलजलार्चितं खगशृगालमीनक्षतं
चलल्लहरिलोलितं रुचिरतीरजम्बालितम् ।
कदा निजवपुर्मुदा सुरनरोरगैः संस्तुतो-
ऽप्यहं त्रिपथगामिनी प्रियमतीव पश्याम्यहो ! ॥ ११ ॥
त्वत्तीरे वसतिं तवामलजलस्नानं तव प्रेक्षणं
त्वन्नामस्मरणं तवोदयकथासंलापनं पावनम् ।
गङ्गे ! मे तव सेवनैकनिपुणोऽप्यानन्दितश्चाहतः
सुत्वा त्वोद्गतपातको भुवि कदा शान्तश्चरिष्याम्यहम् ॥ १२

इत्येतदृषिभिः प्रोक्तं गङ्गास्तवमनुत्तमम् ।
स्वर्ग्यं यशस्यमायुष्यं पठनात् श्रवणादपि ॥ १३ ॥
सर्वपापहरं पुंसां बलमायुर्विवर्धनम् ।
प्रातमध्याह्नसायाह्ने गङ्गासान्निध्यता भवेत् ॥ १४ ॥
इत्येतत् भार्गवाख्यानं शुकदेवात् मया श्रुतम् ।
पठितं श्रावितं चात्र पुण्यं धन्यं यशस्करम् ॥ १५ ॥
अवतारं महाविष्णोः कल्केः परममद्भुतम् ।
पठतां शृण्वतां भक्त्या सर्वाशुभविनाशनम् ॥ १६ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
गङ्गास्तवो नाम विंशोऽध्यायः ।

एकविंशोऽध्यायः ।

सूत उवाच । अत्रापि शुकसंवादो मार्कण्डेयेन धीमता ।
अधर्मवंशकथनं कलेर्विवरणं ततः ॥ १ ॥
देवानां ब्रह्मसदनप्रयाणं गोभुवा सह ।
ब्रह्मणो वचनाद्विष्णोर्जन्म विष्णुयशोगृहे ॥ २ ॥
समत्यां स्वांशकैर्भ्रातृचतुर्भिः शम्भले पुरे ।
पितुः पुत्रेण संवादस्तथोपनयनं हरेः ॥ ३ ॥
पुत्रेण सह संवासो वेदाध्ययनमुत्तमम् ।
शस्त्रास्त्राणां परिज्ञानं शिवसन्दर्शनं ततः ॥ ४ ॥
कल्केस्तवं शिवपुरो वरलाभः शुकापनम् ।
शम्भलागमनं चक्रे ज्ञातिभ्यो वरकीर्त्तनम् ॥ ५ ॥
विशाखयूपभूपेन निजसर्वात्मवर्णनम् ।
महाभागात् ब्राह्मणानां शुकस्यागमनं ततः ॥ ६ ॥

कल्किना शुकसंवादः सिंहलाख्यानमुत्तमम् ।
शिवदत्तवरा पद्मा तस्या भूपस्वयंवरे ॥ ७ ॥
दर्शनात् भूपसङ्घानां स्त्रीभावपरिकीर्त्तनम् ।
तस्या विषादः कल्केस्तु विवाहार्थं समुद्यमः ॥ ८ ॥
शुकप्रस्थापनं दौत्ये तया तस्यापि दर्शनम् ।
शुकपद्मापरिचयः श्रीविष्णोः पूजनादिकम् ॥ ९ ॥
पादादिदेहध्यानञ्च केशान्तपरिवर्णितम् ।
शुकभूषणदानञ्च पुनः शुकसमागमः ॥ १० ॥
कल्केः पद्माविवाहार्थं गमनं दर्शनं तयोः ।
जलक्रीड़ाप्रसङ्गेन विवाहस्तदनन्तरम् ॥ ११ ॥
पुंस्त्वप्राप्तिश्च भूपानां कल्केर्दर्शनमात्रतः ।
अनन्तागमनं राज्ञां संवादस्तेन संसदि ॥ १२ ॥
षण्ढत्वादात्मनो जन्म कर्म्म चात्र शिवस्तवः ।
मृते पितरि तद्विष्णोः क्षेत्रे मायाप्रदर्शनम् ॥ १३ ॥
अत्राख्यानमनन्तस्य ज्ञानवैराग्यवैभवम् ।
राज्ञां प्रयाणं कल्केश्च पद्मया सह शम्भले ॥ १४ ॥
विश्वकर्म्मविधानञ्च वसतिः पद्मया सह ।
ज्ञातिभ्रातृसुहृत्पुत्रैः सेनाभिर्बुद्धनिग्रहः ॥ १५ ॥
कथितश्चात्र तेषाञ्च स्त्रीणां संयोधनाश्रयः ।
ततोऽत्र बालखिल्यानां मुनीनां स्वनिवेदनम् ॥ १६ ॥
सपुत्रायाः कुथोदर्य्या बधश्चाच प्रकीर्त्तितः ।
हरिद्वारगतस्यापि कल्केर्मुनिसमागमः ॥ १७ ॥
सूर्य्यवंशस्य कथनं सोमस्य च विधानतः ।
श्रीरामचरितं चारु सूर्य्यवंशानुवर्णने ॥ १८ ॥

देवापेश्च ! मरोः ! सङ्गे युद्धायात्र प्रकीर्त्तितः ।
महाघोरवने कोक-विकोकविनिपातनम् ॥ १८ ॥
भट्टालगमनं तत्र श्यामाकर्णादिभिः सह ।
युद्धं शशिध्वजेनात्र सुशान्ताभक्तिकीर्त्तनम् ॥ २० ॥
युद्धे कल्केरानयनं धर्म्मस्य च सुतस्य च ।
सुशान्तायाः स्तवस्तत्र रमोद्वाहस्तु कल्किना ॥ २१ ॥
सभायां पूर्वकथनं निजगृहत्वकारणम् ।
मोक्षः शशिध्वजस्यात्र भक्तिप्रार्थयितुर्विभोः ॥ २२ ॥
विषकन्यामोचनञ्च नृपाणामभिषेचनम् ।
मायास्तवः शम्भलेषु नानायज्ञादिसाधनम् ॥ २३ ॥
नारदात् विष्णुयशसो मोक्षश्चात्र प्रकीर्त्तितः ।
सुसुतधर्म्मप्रवृत्तिश्च रुक्मिणीव्रतकीर्त्तनम् ॥ २४ ॥
ततो विहारः कल्केश्च पुत्रपौत्रादिसम्भवः ।
कथितो देवगन्धर्व्वगणागमनमत्र हि ॥ २५ ॥
ततो वैकुण्ठगमनं विष्णोः कल्केरिहोदितम् ।
शुकप्रस्थानमुचितं कथयित्वा कथाः शुभाः ॥ २६ ॥
गङ्गास्तोत्रमिह प्रोक्तं पुराणे मुनिसम्मतम् ।
जगतामानन्दकरं पुराणं पद्मलक्षणम् ॥ २७ ॥
सकल्किसिद्धिदं श्लोकैः षट्सहस्रं शताधिकम् ।
सर्वशास्त्रार्थतत्त्वानां सारं श्रुतिमनोहरम् ॥ २८ ॥
चतुर्वर्गप्रदं कल्किपुराणं परिकीर्त्तितम् ।
कलयान्ते हरिमुखात् निःसृतं लोकविस्तृतम् ॥ २९ ॥
मुनो ! व्यासेन कथितं द्विजरूपेण भूतले ।
विष्णोः कल्केर्भगवतः प्रभावं परमाद्भुतम् ॥ ३० ॥

ये भक्त्यात्र पुराणमारममलं श्रीविष्णुभावाप्तुतं
शृण्वन्तोह वदन्ति साधुसदसि क्षेत्रे सुतीर्थाश्रमे ।
दत्वा गां तुरगं गजं गजवरं स्वर्णं द्विजायादरात्
वस्त्रालङ्करणैः प्रपूज्य विधिवत् मुक्तास्त एवोत्तमाः ॥३१
श्रुत्वा विधानं विधिवत् ब्राह्मणो वेदपारगः ।
क्षत्रियो भूपतिर्वैश्यो धनी शूद्रो महान् भवेत् ॥ ३२
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां पठनात् श्रवणादपि ॥ ३३ ॥
इत्येतत् पुण्यमाख्यानं लोमहर्षणजो मुनिः ।
श्रावयित्वा मुनीन् भक्त्या ययौ तीर्थाटनाहृतः ॥ ३४
शौनको मुनिभिः सार्द्धं सूतमामन्त्र्य धर्मवित् ।
पुण्यारण्ये हरिं ध्यात्वा ब्रह्म प्राप स योगवित् ॥ ३५
लोमहर्षणजं सर्व-पुराणज्ञं यतव्रतम् ।
व्यासशिष्यं मुनिवरं तं सूतं प्रणमाम्यहम् ॥ ३६ ॥
आलोक्य सर्वशास्त्राणि विचार्य्य च पुनः पुनः ।
इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ३७ ॥
वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ॥ ३८ ॥

सजलजलददेहो वातवेगैकवाहः
करधृतकरवालः सर्वलोकैकपालः ।
कलिकुलबलहन्ता सत्यधर्मप्रणेता
कलयतु कुशलं वः कल्किरूपः स भूपः ॥ ४९ ॥

इति श्रीकल्किपुराणेऽनुभागवते भविष्ये तृतीयांशे
एकविंशोऽध्यायः ।
समाप्तम् ।